# Sarva Deva Devi Ashtottarashata Naman Muktanjali

# સર્વદેવદેવ્યષ્ટોત્તરશતનમનમુક્તાઞ્જલિઃ

## Document Information

Text title : Sarva Deva Devi Ashtottarashata Namana Muktanjali

File name : sarvadevadevyaShTottarashatanamanamuktAnjalI.itx

Category : devii, shiva, raama, gurudev, sarasvatI, sangraha, ganesha, aShTottarashatanAma, devI

Location : doc_devii

Author : Smt. Rajeshwari Govindaraj

Transliterated by : Lakshmi

Proofread by : Lakshmi, Smt. Rajeshwari Govindaraj

Latest update : December 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# સર્વદેવદેવ્યષ્ટોત્તરશતનમનમુક્તાઞ્જલિઃ

## ૧ પરમ ગુરુસ્તુતિઃ

ઓંકારરૂપમ્ । ઓંકારોપાસકતત્પરં ।
ઓંકારસ્પંદનકારકમ્ । ઓંકાર તેજ બલ વ્યાપકં ।
ઓંકાર લીન સર્વભાષાંતર્મૂલમ્ ।
ઓંકારવ્યાપ્ત સપ્તસ્વરવિન્યાસલોલમ્ ।
ઓંકારાંતર્ગત સર્વાક્ષરાકારમ્ ।
ઓંકાર દીપ્તિમય સર્વરૂપાકારમ્ ।
અકાર ઉકાર મકારેતિ અક્ષરત્રય શક્તિઘનમ્ ।
વૈશ્વાનર તૈજસ પ્રાજ્ઞસ્થાનવ્યાપકં શબ્દબ્રહ્મરૂપં અંતરતમગુરું ભાવયામિ ॥

## ૨ સદ્ગુરુ ધ્યાનં

સાક્ષાત્ પરબ્રહ્મેતિ પ્રકીર્તિતમ્ ।
બ્રહ્મહરિહરેતિ સમાખ્યાતમ્ ।
સિદ્ધીશ્વરેતિ વિખ્યાતમ્ ।
સુગુણાભરણભૂષિતં સાધકગણવેષ્ટિતમ્ ।
કૃપાનેત્રરાજિતમ્ । દિવ્યચક્ષુસહિતં । સાધક દિવ્યચક્ષૂન્મીલન મુદિતં । તપસ્સ્વાધ્યાયરંજિતં । શિષ્યવૃંદારાધિતં । દૈવારાધનરતં ।
સુજ્ઞાનપ્રિયવાંછિતં
શ્રી સદ્ગુરું ધ્યાયામિ ॥

## ૩ ગુરુસ્તવનમ્

અધ્યાત્મચિંતન પ્રેરકમ્ ।
અધ્યાત્મસાધન કારકમ્ ।

જીવરહસ્ય બોધકમ્ ।
જીવનવિધાન નિર્દેશકમ્ ।
જીવદાત ભગવદ્ભક્તિપથદર્શકમ્ ।
વંદે ત્રિમૂર્ત્યાત્મકમ્ ।
અહંભાવ વર્જકમ્ ।
આત્મદૌર્બલ્ય નાશકમ્ ।
કરણમૈત્રિ સાધકમ્ ।
યોગતંત્રાનુશાસકમ્ ।
શિષ્યગુણશક્તિ નિયામકમ્ ।
ચરાચરસ્થ પ્રાણદર્શકમ્ ।
યોગાનુભવ સોપાન સૂચકમ્ ।
પ્રાપ્તસિદ્ધિ રોમાંચકમ્ ।
સંશય નિવારકમ્ ।
સદ્ગુરું વંદે ત્રિમૂર્ત્યાત્મકમ્ ।

## ૪ સરસ્વતી સ્તોત્રમ્

હે મંદસ્મિત વદનારવિંદે ।
શ્રી શારદે ।
સમસ્ત ભૌતિકાધ્યાત્મિક શાસ્ત્રવિશારદે ।
બ્રહ્મતત્ત્વવિદે ।
કચ્છપિવીણાવાદનકોવિદે ।
બ્રહ્મદેવ સૃષ્ટિ કર્મસ્ફૂર્તિપ્રદે ।
ઐંકારજપ સાફલ્યદે ।
વરદે ।
ત્વમેવ શરણમ્ ॥

## ૫ શ્રી સરસ્વતી સ્તુતિઃ

શુભ્રવસ્ત્રધરિ । વીણાપુસ્તકમાલાધરિ ।
ચતુર્મુખ પ્રિયકરિ ।
ઐંકાર વૃક્ષવલ્લરિ ।

હે સરસ્વતિ કૃપાસાગરિ ।
પરંધામ પ્રાપ્તિકરિ ।
વિજ્ઞાનાધીશ્વરિ । સુજ્ઞાનદીપાંકુરિ ।
નિગમાગમરહસ્યાકરિ ।
લલિતકલાનંદરત્નાકરિ ।
ધૈર્યસ્થૈર્યકરિ ।
ચિરસત્યદર્શનકરિ ।
દહ મમ જડત્વમ્ ।
વર્ધય મમ અંતઃસત્વમ્ ॥

## ૬ પ્રણવ સ્તુતિઃ

ઓંકાર વાચકમ્ । બ્રહ્મદર્શકં ।
ભેદગહ્વરતારકમ્ ।
સમસ્તનાદ તરંગોત્પાદન કારકમ્ ।
ઈશ્વર સંપર્ક સાધકમ્ ।
સમસ્તાભિદાનાભિદેયવ્યાપકમ્ ।
અધિકતમ શક્તિયુત કંપનરૂપકમ્ । અનાહતનાદવ્યાપકં ।
પરાપશ્યંતી મધ્યમા વૈખરીરૂપ પ્રકટિતમ્ ।
આદ્યંતરહિતમ્ ।
સર્વદેશકાલસ્થિતમ્ ।
કાર્યકારણચક્રાંતર્ સ્થિતમ્ ।
સાકારનિરાકાર ભેદરહિતમ્ ।
વિશ્વસ્પંદનમ્ આશ્રયામિ ॥

## ૭ આચાર્યસ્મરણં

ધ્યાન સમાધિ તલ્લીનમ્ ।
ઓંકારનાદલીનમ્ ।
સંન્યાસાશ્રમ નિધાનમ્ ।
પર્ણકુટીરવાસિનમ્ ।
અજ્ઞાનતિમિરહરણમ્ ।

શિષ્યોદ્ધરણમ્ । પવિત્રચરણં ।
કર્મભક્તિજ્ઞાન મર્મવિવેચનમ્ ।
શમદમાદિ સંપદ્ભૂષણમ્ ।
આચાર્યદેવં સ્મરામિ ।
સર્વદાલોક લોકસેવાતોષણમ્ ।
અભ્યાસવૈરાગ્યનિષ્ઠ ભવતારણમ્ ।
શ્રદ્ધાભક્તિસહિત જન્મપાવનમ્ ।
બ્રહ્મતત્વનિરૂપણમ્ ।
બ્રહ્મભાવરંજનમ્ ।
નિરંજનમ્ । આચાર્યદેવં અનુદિનં પ્રાતઃસ્મરામિ ।
આચાર્યદેવં અનુદિનં સાયં સ્મરામિ ॥

## ૮ સદ્ગુરુ વંદનં

આત્મજ્ઞાનબોધકમ્ ।
આત્મશુદ્ધિકારકમ્ ।
આત્મદૈન્યનિવારકમ્ । ભાવમૈત્રિસાધકં ।
જીવસંસ્કારપ્રેરકમ્ ।
સાધન વિધાનાનુશાસકમ્ ।
શિષ્યગુણાવગુણ વિમર્શકમ્ ।
ભ્રાંતિ નાશકમ્ ।
ચરાચરસ્થચૈતન્યશક્તિ પ્રદર્શકમ્ ।
આસુરીગુણાંતકમ્ ।
ભક્તિભાવોદ્દીપકમ્ ।
ત્રિમૂર્ત્યાત્મકમ્ ।
સદ્ગુરું વંદે ॥

## ૯ વિશ્વગુરુ નમનં

કવિપુંગવ વર્ણિતમ્ । યતિવરેણ્ય ધ્યાનં ।
પ્રાજ્ઞમણિ વ્યાખ્યાત મહિમાયુતમ્ ।
સુધીમણિજ્ઞાતમ્ । મહર્ષિગણ સેવિતં ।

શિષ્યવૃંદોપાસિતમ્ ।
ભક્તગણ સંદર્શિતમ્ ।
દીનજનાશ્રિતમ્ । કલોપાસક સત્વવર્ધકં ।
સુજ્ઞાનપ્રદાતમ્ । વિજ્ઞાન નિરતં । ત્રિગુણાતીતં ।
ધીમનોસાક્ષીભૂતમ્ ।
સર્વજનહિતમ્ । વિશ્વગુરું નમામિ ॥

## ૧૦ શ્રી ગુરુસ્મરણં

સદ્ગુરુ વરિષ્ઠ । શ્રોત્રીય બ્રહ્મનિષ્ઠ ।
પરમશ્રેષ્ઠ । ચિદ્ગુહ પ્રવિષ્ટ । ત્વાં અનુક્ષણં સ્મરામિ । દયામય પરમશિષ્ટ ।
સધ્દર્મપાલનાર્થં દૈવીગુણાન્ પ્રયચ્છ ।
ચિત્તશુદ્ધિલાભાર્થં તવભક્તિભાગ્યં પ્રયચ્છ ।
આત્મજ્ઞાનાર્થં કરણનિગ્રહબલં પ્રયચ્છ ।
જન્મસાફલ્યાર્થં ધ્યાન નિષ્ઠાં પ્રયચ્છ ॥

ત્વયા વિના કો મમ આશ્રિત પારિજાતઃ?
તવ સ્મરણેન વિના કો મમ કૃપાચિંતામણિઃ ॥

## ૧૧ ગુરુ પ્રાર્થના

હે ગુરુદેવ! પ્રત્યક્ષ પરદેવ!
કોઽસ્તિ ત્વત્સમ કારુણ્યનિધિઃ । મંદહાસ વદન । આશ્રિત પાવન ।
પુનીત ચરણ । જ્ઞાનઘન સદા પ્રસન્નચિત્તોઽસિ મંદસ્મિતવદનાવન ।
શિષ્યોધ્દારણ સાધકશક્તિ સંચાલકોઽસિ ।
દૃગ્દૃશ્ય વિવેચનં બોધયિત્વા ।
ધ્યાનયોગપથે માં ગમય સમાધીશ્વર
શ્રવણ મનન નિધિધ્યાસન સિધ્દોઽસિ
આત્મબુદ્ધિ પ્રચોદય
તમસોમા જ્યોતિર્ગમય હે વિજ્ઞાનેશ્વર
તવ મહિમા શ્ૃત્વા આકર્ષિતોઽસ્મિ શરણાગતોઽસ્મિ
વિદિત્વા તવ બોધનવિધાનતંત્રમ્ ।
દૃષ્ટ્વા તવ શિષ્યવાત્સલ્યં

હર્ષિતોઽસ્મિ સુવિચારરત્નાકર! સિદ્ધીશ્વર!

## ૧૨ ગણેશસ્તવમ્

ગિરીશપુત્રીજમ્ । સ્કંદાગ્રજં । વિઘ્નરાજં । વિરજં । અજં । બ્રહ્મતેજં । પ્રથમ પૂજિત ચરણ સરોજં ગણરાજં । ભજેહં ॥ માતંગાનનં । મૂષકવાહનં । સૂક્ષ્માવલોકનં । ભવારણ્ય પથ પ્રદર્શનં । ધીપ્રદાનં આસુરીગુણનિવારણં । દૈવીગુણવર્ધનં । ભજેહં ॥ લંબોદરં । અજ્ઞાનહરં । કલિકલુષવિદૂરં । કલાક્ષેત્રવિહારં । વિદ્યાસારં । ભજેહં ॥

## ૧૩ ગણનાથ ધ્યાનં

એકદંતમ્ । મૂલાધાર ચક્રનિવસંતં । અનંતં । પ્રતિપાદિત સર્વસિદ્ધાંતં । મહાશાંતં । ધીમંતં ।
’ગં’ બીજાક્ષરોપાસિતમ્ ।
સંકટવશવૃંદાશ્રિતમ્ । ચિંતિતવિશ્વહિતં । અપરાજિતં । શાશ્વતં । પાશાંકુશધર કરાંબુજભૂષિતં । મૂષકાસુરારાધિતં । સિદ્ધિબુદ્ધિસેવિતં । સર્વયજ્ઞદાન તપારંભાદિપૂજિતં । મુનિગણદેવગણાશ્રિતં । શિવમનોહરસુતં ।
તં ગણનાથં સતતં ભજેહમ્ ॥

## ૧૪ ગણપતિ વંદનં

હે દ્યુતિમય શરીર । પાશાંકુશધર । ગણેશ્વર । ગુણેશ્વર । વિઘ્નહર । મહોદર । શિવપાર્વતીસુકુમાર કલુષવિદૂર । સદ્વિચાર રત્નાકર । રક્ષમામ્ ॥

માતંગાનન । મૂષકવાહન । જ્ઞાન નિકેતન । મૂલાધાર ચક્રસદન । ભવભંજન રક્ષમામ્ ॥

હે અજ । ચતુર્ભુજ । ષણ્મુખાગ્રજ । મહાતેજસ્વિપૂજિત પદપંકજ રક્ષમામ્ ॥

## ૧૫ સરસ્વતી સ્તુતિઃ

શ્રેયા । અક્ષયા । અંતરંગ સુખોદયા ।
શુભોદયા । અજયા । વિજયા । દુર્વિજ્ઞેયા । આસ્તિક સમુદાય સદ્ધર્મોદયા । કૈવલ્યાલયા । ખિન્નચિત્ત પરિતાપોપાયા । તાપસધ્યેયા । શુભોદયા । ગાયક કવિ વિચક્ષણજ્ઞેયા । સાધકનિરપાયા । મનીષિવૃંદસુપ્રિયા । વિદ્યાલયા । ત્યાગધનાલયા । આનંદમયકોશદીપ્તિવલયા । સામ્યદૃષ્ટિપ્રિયા । ચતુર્મુખપ્રિયા । સરસ્વત્યેવ મમ પ્રાણપ્રિયા ॥

## ૧૬ વ્યાસ સ્તુતિઃ

બ્રહ્મવિદ્વરિષ્ઠમ્ । શિષ્યોદ્ધરણ નિષ્ઠં । બ્રહ્મતત્વ બોધક વરિષ્ઠં । સાધિત ધ્યાન સમાધિ યોગ સ્પષ્ટં । નિવારિત સર્વારિષ્ટં । જ્ઞાનવિજ્ઞાન તુષ્ટં । વેદવિભજન યજ્ઞસાફલ્ય તુષ્ટં । અષ્ટાદશપુરાણરચન ધન્ય મુનીંદ્ર શ્રેષ્ઠં । શુકમહામુનિ બ્રહ્મભાવ સંતુષ્ટં । ભગવદ્ગીતાગ્રંથાવતરણ કારણ પરમશિષ્ટં । સદ્ગુરુ વિશિષ્ટં । જ્ઞાનક્ષેત્ર સુપ્રતિષ્ઠં । શિરસા નમામિ ॥

## ૧૭ નારાયણ સંસ્મરણમ્

પુરુષોત્તમ । આકાશોપમ । સર્વોત્તમ । કૈવલ્યધામ । ભાવસંઘર્ષણ વિરામ । આત્મારામ । ભક્તિસાગરસોમ । ભંડનભીમ । વૈકુંઠધામ । પૂર્ણકામ । નીલમેઘશ્યામ । વિહિતસર્વાનન્ય ભક્તવૃંદ યોગક્ષેમ । પરંધામ । ક્ષમસ્વ મમ સર્વાપરાધાન્
ત્વમેવૈકઃ મમ સર્વસ્વમ્ । હે નિર્મમ ! નિષ્કામ ॥

## ૧૮ શ્રીરામ સ્તુતિઃ

ભાનુકુલાંબુધિરજનીકરમ્ । અયોધ્યાધીશ પરમપ્રિયકુમારં । જનકાત્મજામનોહરં । ગુણગંભીરં । સુધીરં । અનુપમશૂરં । ધર્માધારં । વામનાવતારં । શ્રીધરં । કૌસલ્યાનંદકરં । ભરતાનુગ્રહકરં । શતૃઘ્નવાત્સલ્યધરં । પતિતોદ્ધારં । સ્મરામિ લક્ષ્મણસેવિત સદાચારં । પિતૃવાક્યપરિપાલનાર્થં
કૃતવિપિન વાસ નિર્ધારમ્ । દિવ્યચારિત્ર્યાધારં । રાવણ સંહારં । દૈત્યાનાં તાંડવ નિર્મૂલનકરં । એકપત્નીવ્રતધરં । સ્મરામિ ॥

હનુમત્સેવિત ભક્તિસારમ્ । કોદંડધરં । મત્સ્યકૂર્મવરાહાદિ દશાવતારં । ધીરલવકુશ પ્રાવીણ્ય નંદન વિહારં । પ્રપન્નહૃદયેશ્વરં । સર્વજીવ પાવનકરં । શ્રીરામં સુંદરાકારં સ્મરામિ મુહુર્મુહુઃ ॥

## ૧૯ શ્રીરામ સ્તવમ્

દશાસ્ય મર્દનમ્ । દશાવતાર રુપનારાયણં । જનકાત્મજારમણં । જનકવાક્યપરિપાલનં । કૌસલ્યાનંદનં । દશરથ ભૂપતિ પ્રાણસમાનં । ધર્મપરાયણં । વંદે ઇનકુલશરધિનંદનં । સકલસુગુણાભરણં । અયોધ્યાસામ્રાજ્ય પરિપાલનં । એકાર્ધાંગિનીવ્રત પરિપાલનં । જન્મપાવનં । ભૂતભાવનં । કૃપાલોચનં । પ્રસન્નવદનં । વિજિતકરણં । સુધીશ્રીભૂષણં । અજ્ઞાનહરણં । પતિતપાવન ચરણં । સંતવરિષ્ઠાર્પિત જીવનં । વંદે

## ૨૦ હનુમત્સ્તુતિઃ

શ્રીરામચંદ્ર સેવારમણમ્ । અંજનાદેવિ હર્ષવર્ધનં । સાગરલંઘનં । સેતુબંધનં । સીતામાતાન્વેષણં । લંકાદહનં । શ્રીરામ સેવાર્થ વાનરવ્યૂહ નયનં । સંજીવિની પર્વતાનયનં । લક્ષ્મણ પ્રાણરક્ષણં । વિજિતકરણં । અણિમા મહિમાલઘિમાગરિમાદિ સિદ્ધિ પ્રદર્શનં । મહાસંતં । વંદે ભાગવતં વંદે ॥

## ૨૧ શ્રીરામનમનમ્

શ્રીરામમ્ । મોક્ષધામં । આત્મારામં । આપ્તકામં સત્યકામં । ઇનકુલસોમં ગાતું મોદયામિ । સદ્ધર્મસુગુણગણયુતં । સચ્ચરિતં । નિત્યમુદિતં । શાંતનેત્ર પ્રકાશિતં । નવરત્નહારકિરીટ શોભિતં । જાનકી પ્રાણ નાથં । અયોધ્યાપુરપતિ સુતં । મૂર્તપ્રજાપ્રેમાદ્ભુતં । મર્યાદા પુરુષોત્તમેતિ પ્રકીર્તિતં । ધનુશ્શરસહિતં । ગાતું મોદયામિ ॥

ભરતાનુજમ્ । લક્ષ્મણ શતૃઘ્નાગ્રજં । મારુતી સેવિત પદસરોજં । વિરજં । ગાતું મોદયામિ ॥

રાજપ્રાસાદસ્થિત તપોરતમ્ । તારકમંત્રોપાસકાશ્રિતં । માતૃત્રય ચરણાંબોજ સમભક્તિ પ્રદર્શિતં । વર્ણયિતું મોદયામિ ॥

## ૨૨ દક્ષિણામૂર્તિ સ્તોત્રમ્

હે દક્ષિણામૂર્તિમ્ । પરમગુરુમૂર્તિમ્ પ્રાર્થયામિ । અવિદ્યાગુહે બંધિતોઽસ્મિ । અનિત્યવસ્તુસ્પૃહે અવિરતોઽસ્મિ । અસત્ય મોદતરંગે
વિચલિતોઽસ્મિ । અશુદ્ધભાવોત્તુમ્ । હે સમ્મોહિતોઽસ્મિ ।
અનુક્ષણચિંતિત વિચારગંગાપાને ।
અનુદિનકૃત સૃજન કર્મશીલ ગાને ।
અનુભવાલયે પરિપરિઘટન દર્શનયાને
તિષ્ઠોઽસ્મિ તુ માયાવૃતોઽસ્મિ ।
મામુદ્ધરતુ ભગવાન્ શીઘ્રં પરશિવઃ મામ્ દૈન્યભાવપૂર્ણમ્ ॥

## ૨૩ ચતુર્મુખ બ્રહ્મસ્મરણમ્

હે સૃષ્ટિકર્તા ચતુરાનન ।
શોભાસદન । ચરાચરભાવન । ભારતીચિત્તરંજન । નમામિ કમલનાભનંદન । કમલાસન ।

ત્વમેવ સૂક્ષ્મદર્શિ । સમદર્શિ । ત્વમેવ દૂરદર્શિ । દીર્ઘદર્શિ ।

ત્વમેવ તત્ત્વદર્શિ । સમ્યગ્દર્શિ ।

ત્વમેવ ભુવનત્રય પિતા માતા ।
ત્વમેવ વિધાતા । તપસ્વિ વરદાતા ।

યુગયુગાંતરેઽપિ અવિરત સૃષ્ટિકર્મનિરત
પૂર્વકલ્પજ્ઞાનસહિત । પ્રમાદરહિત ।

સ્વપરભેદરહિત । ત્વમેવ ચિંતનીયઃ સ્મરણીયઃ વંદનીયઃ ॥

## ૨૪ સરસ્વતી સ્તુતિઃ

વિરિંચિ પ્રિયવલ્લભામ્ । શુભાં । શારદાંબાં । દિવ્યજ્ઞાનપ્રભાં । શુદ્ધભક્તિસુલભાં । ભજ હે માનસ ॥

ષડ્દર્શનગિરિશ્રેણિ વિહારિણીમ્ । વીણાપાણિં ।
સત્યદર્શનરાગિણીમ્ । મયૂરવાહિનીં ।
અસીમવિદ્યાપ્રકાશપ્રસારિણીમ્ ।
અનંત જ્ઞાન ક્ષેત્રાંતર્યામિનીમ્ ।
વૈદિક સંપ્રદાય પરંપરાવન પરાયણીમ્ ।
ભજ હે માનસ અનવરતં
ભજ હે માનસ ભક્ત્યા અનવરતમ્ ॥

## ૨૫ લલિતા સ્તવમ્

વેદ દીક્ષા સમન્વિત સમુપાસિતે । શ્રીલલિતે ।
મૂર્તામૂર્તભુવનમાતે । દિવ્યજ્ઞાનસંપદ્પ્રદાતે ।
અનુપમલાવણ્ય શોભિતે । ચતુર્હસ્તસંયુતે ।
પાશાંકુશહસ્તે । સુવાસિનિસંપૂજિતે । કૈવલ્યદાતે । ત્વાં દર્શયામિ મોદયામિ ચ ।

ત્રિલોકૈક સમારાધિતે । વ્રતનેમનિષ્ઠ સિદ્ધિદાતે ।
મંદસ્મિતે । ચિદાનલસંભૂતે । જીવકારુણ્યભરિતે । સુરચાપ સદૃશભ્રૂયુતે । આપાદમસ્તકાલંકૃતે ।
શ્રીમત્સિંહાસનાધીશ્વરિ શ્રીમાતે । ત્વાંદર્શયામિ મોદયામિ ચ ॥

## ૨૬ ઈશ સ્તુતિઃ

ગમકચમક નમકારાધ્યમ્ । તપોમાનસ સાધ્યં ।

ભક્તિ પ્રપત્તિ પૂર્ણવેદ્યમ્ ।
સદા ચિંતયામિ । નિવેદયામિ
તસ્ય ચરણરાજીવે
મમ પદ્યં
તસ્ય ધ્યાનમાત્રેણ તસ્ય કૃપામાત્રેણ
સર્વં ભવતિ સાધ્યમ્ । હૃદ્યં । મમ ચંચલચિત્તસ્ય કિંચિદપિ સર્વમસાધ્યં ।
અલ્પજ્ઞોઽહં ન જાનામિ કિં વદ્યં કિં ગ્રાહ ।
સઃ એવ મહેશ્વરઃ । નટશેખરઃ । ત્રિશૂલધરઃ ।
નીલકંઠઃ પાર્વતીહર્ષકરઃ । આવતુ માં ઉદ્ધરતુ મામ્ ॥

## ૨૭ શિવમહિમાસ્તુતિઃ

ઉડુપતિશેખરેણ । અજરેણ । અમરેણ । વિશિષ્ટનાગાભરણધરેણ । વિષધરેણ । ભસ્મભૂષિત શરીરેણ । સદાનંદકારણેન વિનાકથં પ્રાપ્તમસ્તિ ભક્તિ જ્ઞાનવૈરાગ્યભાવનમ્ । દક્ષિણામૂર્તિરૂપેણ । ધ્યાનાસક્તેન । તપોધારાલીનેન ।
ગંગાશ્રિત જટાજૂટધરેણ । ઉમા રમણમહેશ્વરેણ । કૈલાસ સદનેન સમાધીશ્વરેણ વિના ધર્માચરણયુત નિષ્કામ ભક્તિઃ કથં પ્રાપ્તમસ્તિ ॥

## ૨૮ ઈશ સ્તુતિઃ

સાક્ષાત્ બ્રહ્મસ્વરૂપમ્ । જીવેશ્વર રૂપં । કૈલાસાધિપં । હિમાદ્રિપ સંજાતાધિપં । ગણાધિપ દેવસેનાધિપ પ્રતાપાધિપં । શતૃતપં આરાધયામિ સ્થાપયિત્વા અર્પણદીપં । ભાલનયનં । સર્વદા તપસ્વી વરપ્રદાનં । ધ્યાનસમાધિલીનમ્ । સૃષ્ટિસ્થિતિલયસંતુલનં । કર્મભાવ સમ્મિશ્રણ સંસ્કાર ફલપ્રદાનં । ઢક્કાનિનાદ તલ્લીનં । ચિદ્પુર સદનં । પ્રમથ ગણ સેવાધીશં । ભક્તિ જ્ઞાનયોગ સંધાનં । વૈરાગ્ય નિધાનં । આરાધયામિ આઘ્રાપયામિ સ્તવ તપો ધૂપં ॥

## ૨૯ રાજરાજેશ્વરી સ્તોત્રમ્

ક્ષણક્ષણપરિવર્તિત વિશ્વ વીક્ષણી ।
શ્રીરાજરાજેશ્વરી । સિંહવાહની । ગુણગણવૈલક્ષણ્ય સ્થાપિની । ગુણાવગુણ દ્વિપક્ષકદનસાક્ષિણી ।
આકાશ વાયુ પાવકવારિ પૃથ્વિવ્યાપિની । વિવિધ સંસ્કૃતિ વિવર્ધિની અવતુમામ્ ॥

વિકૃતિનિરોધિની પ્રકૃતિપાવની । સંસ્કૃતિરક્ષિણિ બન્દવિમોચનિ ।

દુશ્ચરિતમાનસપાવનિ ।
સત્યાન્વેષક ધૃત્યુત્સાહ પ્રદાયિની ।
વિશ્વતૈજસ પ્રાજ્ઞરૂપિણી । તુરીય ધામસ્વામિનિ । કાલત્રયાતીત સનાતની । રંજની । અવતુમામ્ ॥

નિત્યશુદ્ધ બુદ્ધમુક્તરૂપિણી ।
દુરાચારવશ પરિવર્તિની । દૌર્ભાગ્ય શીલ પરિરક્ષિણી ।
દુશ્ચરિત માનસ પાવનિ અવતુમાં વિશ્વવાત્સલ્યવર્ષિણી ॥

## ૩૦ નારાયણ સ્તુતિઃ

નળિની સખ સહસ્રપ્રકાશમ્ । વૈકુંઠ લોકાધીશં । મહાલક્ષ્મીશં । સુરેશ્વર નરેશ્વરેશં । ભક્તચિત્કમલ વિકાસં । તુંબુરુનારદ ગાનતોષં । સનકસનંદનાદિ મુનિવંદિત મહિમાવિશેષં । સચ્ચિદ્વિલાસં । સગુણસવિશેષં । નિર્ગુણ નિર્વિશેષં । મધુરભાષં । ધર્મ પરાયણતાસંકાશં । નેત્રાકર્ષકવેષં । સદ્ભાવસુવિચાર સમુલ્લાસં । પીતવાસં । મનોહર કેશં સર્વથા ધ્યાયેત્ સર્વદા ॥

## ૩૧ નારાયણસ્તવઃ

સંપત્પ્રદાધિપ । ધરાધિપ । સ્વર્ગમર્ત્યપાતાળાધિપ ।
ઋષિમુનિતપસ્વીદેવનરેંદ્રભૂપ । અસમાનપ્રતાપ । દૂરીકૃતપરિતાપ । પરંતપ । ધર્માર્થ કામમોક્ષ પ્રદીપ । યાદવકુલસુદીપ । વેદજ્ઞાનસંદીપ । પાલય મામ્ ॥

યોગમાર્ગપ્રદીપક । ત્યાગયોગપ્રેરક । આત્મસંભાવિત પરિવર્તક । દિતિતનુજવંશસંહારક । ભક્તિભાવપૂરક । દૈવીગુણગણવ્યાપક । ધર્મસંસ્થાપક । ભુવન મોહક । કસ્તૂરી તિલક । દ્રુપદનંદિનીરક્ષક । અજામિળોદ્ધારક । પંચતન્માત્રાત્મક । પંચભૂતોત્પાદક । વૈજયંતીમાલાધર મોહક । પરિપાલય મામ્ ॥

## ૩૨ શ્રીમહાવિષ્ણુ ધ્યાનમ્

શ્રીમન્નારાયણમ્ । ક્ષીરસમુદ્રેશ પુત્રિકારમણં । વૈકુંઠલોકનિવાસિનં । ક્ષીરાંબુનિધિશયનં ।
દુષ્ટશિક્ષણં ચક્રિણમ્ । શિષ્ટરક્ષણં કિરીટિનં । ગદિનં । કમલધારિણં । કાંતિમય દેહિનં । પ્રપત્તિપૂર્ણ ધ્રુવરક્ષણમ્ । પરાભક્તપ્રહ્લાદ દર્શન મોદ કારણં ધ્યાત્વા રમામિ ॥

દ્રુપદાત્મજામાન રક્ષણમ્ । ગજેંદ્ર મોક્ષપ્રદાનં । પ્રસન્નમનસ્ક કૃપાલોચનં । નેત્રપ્રિય વદનં । ભક્તસંકટ હરણં । કૈવલ્યનિધાનં ધ્યાત્વા રમામિ ॥

સર્વજીવ વિધાતમ્ । સગુણ નિર્ગુણોપાસિતં । સર્વજીવાશ્રિતં । અવ્યાકૃતં । હિરણ્યગર્ભરૂપસ્થિતં । વિરાડ્રૂપવિરાજિતં । કમલાસનપિતં । ધ્યાત્વા રમામિ । તુલસીવનમાલાભૂષિતં । પરમશાંતં । અનંતં । ધર્મવિવેચનારંજિતં । પીતાંબરભૂષિતં ધ્યાત્વારમામિ ।

## ૩૩ સરસ્વતી સ્તોત્રમ્

સાત્વિક સાધક કૃપાવર્ષિણી । તત્ત્વચિંતનશીલ જ્ઞાનવર્ધિની । દુરિત શમની । મનોચાંચલ્ય નિવારિણી । ચતુરાનન રમણી । વિદ્યાસામ્રાજ્ય સ્થાપિની । એકૈવાસ્તિ સરસ્વતી વિશ્વજનની ॥

વિસ્મયકરવિકાસધર્મસંચાલિની । મૃદુપાણી ।
દ્વૈતવિશિષ્ટાદ્વૈતાનુભવ પ્રબોધિની । અદ્વૈત તત્ત્વપ્રતિપાદિની । કલ્યાણી ।
એકૈકાસ્તિ વિદ્યાજનની સરસ્વતિ સરસિજનયની । પ્રાર્થય ભાવય તાં અદ્યૈવ હે માનસ
પ્રાણસ્પંદને ॥

## ૩૪ શારદા સ્તુતિઃ

શુક્લવસ્ત્રધારિણીમ્ । શુક્લરાજીવાસન રાગિણીં । સુમશક્તિજાગરિણીં । સરસિજોદ્ભવભામિનીં । સરસિજનયનીં । જ્ઞાનપિપાસાવારિણીં । પ્રાજ્ઞશિરોમણિ ગણાશ્રિત ચિંતામણીં । વીણાપાણીં । સંદેહાલસ્યપ્રમાદ દૂરિણીં । સાધક જન્મપાવનીં । શરણાગતાવનીં । સતત સાધનાનિરત ધીશક્તિવર્ધિનીં । મમ હૃત્કમલે પૂજયામિ । સુવિચાર પુષ્પૈઃપૂજયામિ ॥

## ૩૫ શ્રી શારદા સ્તોત્રમ્

વીણાપાણિ । કોકિલવાણિ । સારસદળનયનિ । ત્રિલોકતિમિરાપહારિણિ । ત્રિદેહાવિદ્યાનાશિનિ । શુભ્રવસનધારિણિ । શ્વેતહંસવાહનિ । બ્રહ્મભામિનિ । આત્મવિદ્યાપ્રકાશાનંદદાયિનિ ।
જપમાલાપુસ્તકધારિણિ ।
સત્યલોકવાસિનિ । ચિત્તપ્રસાદરહસ્યભેદિનિ । નાદચિંતામણિ નવરસાબ્ધિયાન
વિનોદિનિ । રસઋષિ ધામભાગ્યપ્રસાદિનિ । નવનવોન્મેષશાલિનિ પ્રતિભોદ્દીપિનિ । પાલયતુ માં પરાપરાવિદ્યારૂપિણિ ॥

## ૩૬ શ્રી સરસ્વતી સ્તોત્રમ્

૧ યા દેવી સંવિત્સાગરી ।
દિવ્યજ્ઞાન સુધાકરી । નમસ્તસ્યૈનમસ્તસ્યૈ

નમસ્તસ્યૈ નમો નમઃ ॥

૨ યા દેવી સૃજનશીલચિત્તાપહરી । બ્રહ્મદેવ મનોહરી
નમસ્તસ્યૈનમસ્તસ્યૈ
નમસ્તસ્યૈ નમો નમઃ ॥

૩ યા દેવી બ્રહ્મવિદ્યા પ્રસારિણી ગુહ્યગામિની ।
નમસ્તસ્યૈનમસ્તસ્યૈ
નમસ્તસ્યૈ નમો નમઃ ॥

૪ યા દેવી સૃજનસૌધામિની વિદ્યાપ્રિય ધીપ્રચોદિની
નમસ્તસ્યૈનમસ્તસ્યૈ
નમસ્તસ્યૈ નમો નમઃ ॥

૫ યા દેવી વીણાનાદ તરંગિણી ।
રાગતાન મોદિની ।
નમસ્તસ્યૈ નમસ્તસ્યૈ
નમસ્તસ્યૈ નમો નમઃ ॥

૬ યા દેવી સ્વરનીરાજનરંજની । સદ્ગ્રંથસારપ્રબોધિની ।
નમસ્તસ્યૈ નમસ્તસ્યૈ
નમસ્તસ્યૈ નમો નમઃ ॥

૭ યા દેવી નટનરચનચિત્ર
કલાતોષિણી । મયૂરવાહિની ।
નમસ્તસ્યૈ નમસ્તસ્યૈ
નમસ્તસ્યૈ નમો નમઃ ॥

૮ યા દેવી શુક્લાંબરધારિણી । ચતુરાસ્યરમણી ।
નમસ્તસ્યૈનમસ્તસ્યૈ
નમસ્તસ્યૈ નમો નમઃ ॥

## ૩૭ શારદા સ્તુતિઃ

યાં વિદ્યાદાયિનીં ચતુર્મુખભામિનીં
સત્યલોકવાસિનીં સુરેંદ્રાદિ દિવિજાઃ સ્તુવંતિ । યાં જ્ઞાન વિજ્ઞાનરતાઃ પુષ્કલ દિવ્યૈઃસ્તવૈઃ સ્તુત્ત્વા તુષ્યંતિ રમંતિ ચ । યાં તુંબુરુનારદ બૃહસ્પત્યાદિ દેવર્ષયઃ ગાયંતિ ભક્તિલોકસંચારે ।

તાં સરસ્વતીમ્ । કલાનંદરસસ્રવંતીં ।
ભગવતીમ્ ।
શિરસા નમામ્યહમ્
મનસા ધ્યાયામ્યહમ્ ॥

## ૩૮ સરસ્વતી સ્તુતિઃ

શ્વેતવસનાન્વિતામ્ । અભ્યાસાતિશય દર્શિતાં । આત્મજિજ્ઞાસાનુરાગવિદિતાં । પામરત્રાતાં । કચ્છપિવીણાનિસ્વનરંજિતાં । ગાયન નર્તન વાચન ચિંતન મુદિતશ્રિતાં । સરસિજોદ્ભવ સહિતાં । સરસ્વતીં આરાધયામિ
ધીમણિવેષ્ટિતામ્ । ઋષિમુનિકવિ
વરપ્રદાતામ્ । અંતર્મુખારાધિતાં । બહિર્મુખ સુપૂજિતાં ।
ત્રિભુવન માતરમ્ આરાધયામિ ।

## ૩૯ સરસ્વતી સ્તુતિઃ

મધુમતીમ્ । રસવતીં । સરસવતીં । નવરસવતીં ।
બ્રહ્મસતીમ્ । સુમતીં । શ્રીમતીં । શ્રીમહાસરસ્વતીં । પ્રાતઃસ્મરામિ વિદ્યાતુરેણ ॥ સમાહિત ચિત્તારાધિતે । સપ્તસ્વરવિન્યાસ મુદિતે । સુવિસ્મયકર દશનાદમય નાદયોગસંપ્રીતે । ઐંકારજપતૃપ્તે । ત્વાં સ્મરામિ હે જગન્માતે । સત્ત્વાધિક્યતાં અભીપ્સ્ય ધ્યાયામિ ॥

## ૪૦ શારદાભિવન્દનમ્

હે સંગીત સામ્રાજ્ય સ્થાપિનિ । હે સાહિત્ય સ્વારાજ્ય સ્વામિનિ । સ્વરવિન્યાસરતકંપનરોમાંચનકારિણિ । રાગતાનપલ્લવિલીન ધીશક્તિ વર્ધિનિ । કમલાસન રાણિ । વાગ્દીપ પ્રજ્વલિનિ । મૌનરાગાલાપિનિ । દશનાદશ્રવણપથચાલિનિ । ચિદ્ગુહાંતર્વાસિનિ । આત્મતત્ત્વપ્રતિપાદિનિ । સચ્ચિદાનંદ રૂપિણિ । હે જનનિ । મયૂરગામિનિ । સરસ્વતિ ધન્યોઽસ્મિ ત્વાં નમસ્કૃત્વા ભૂયો ભૂયો હે સત્વ સંવર્ધિનિ ॥

## ૪૧ સરસ્વતી ભાવનં

સત્યલોકવાસિનીમ્ । શુભ્રવસ્ત્રધારિણીં । સરોરુહદળનયનીં । નયનકાંતિપ્રસારિણીં । જ્ઞાનપ્રિયાકર્ષિણીં । સુમતિપ્રકાશિનીં । સર્વચિત્તવૃત્તિધર્મનિરોધમર્મભેદિનીં । જપમાલાપુસ્તકધારિણીં । પુનરાવૃત્તિપુનરધ્યયન

પ્રચોદિનીં । સાત્વિકરૂપિણીં । શુદ્ધચિત્તપ્રસાદિનીં । રાજસતામસભાવકલુષનિવારિણીં । દુરિતશમનીં । શીઘ્રોધ્ધારિણીં । શ્રીશારદાં જનનીં । ભાવયામિ તામનુદિનં ॥

## ૪૨ ગોવિંદ સ્તવમ્

ધર્મમૂર્તિમ્ ।
ધર્મ માર્ગપ્રવર્તકમ્ ।
ધર્મપાલકમ્ । ધર્માધારં । ધર્મસ્થાપકં । ધર્મરહસ્યવેત્તં । ધર્મિષ્ઠ
સમુદાયરક્ષકમ્ । ધર્મશાસ્ત્રપ્રદીપકં । ધર્માધર્મ
નિર્ણાયકમ્ । ધર્મનીતિન્યાયપ્રિયં । ધર્મનંદનાદિ પંચપાંડવ પરમાપ્તં । ધર્મભ્રષ્ટપરિવર્તકં ।
જગદ્ગુરુ ગોવિંદં ભજ હે માનસ ॥

## ૪૩ સરસ્વતી સ્તુતિઃ

નિરાલંબ સુખદાયિનીમ્ । નિઃશ્રેયસ પથપ્રદર્શિનીં । વિવિધભાવ વાદ્યગોષ્ઠિરાગિણીં । મહાસરસ્વતીં જનનીં ।
વીણાવાદનરંજનીમ્ । રાજીવાસનપ્રિયરમણીં । સ્વરાક્ષરાલંકારયુત કૃતિહર્ષિણીં । આત્મવિદ્યાપ્રકાશિનીં સદા આશ્રયામિ ।
યોગીંદ્રભ્રામરીગુહાંતર્દર્શિતામ્ । બ્રહ્મગોવિંદચંદ્રશેખરદિવિજગણવંદિતાં । વિદ્યાધિદેવતાં । શ્વેતાંબરાન્વિતાં । કલોપાસક સમર્ચિતાં । રસિકશિખામણિવૃંદસમારાધિતાં । નિત્યમુદિતાં । જપમાલાપુસ્તકભૂષિતહસ્તાં । સદા ધ્યાયામિ માતરં ॥

## ૪૪ વીણાપાણિ પ્રાર્થના

નાદયોગ સંપ્રીતે । સમાહિતચિત્ત
સમારાધિતે । સપ્તસ્વરવિન્યાસ સમુદિતે । અક્ષરાકારોપાસિતે । સુસ્મિતે । સુવિસ્મયકર દશનાદશ્રવણ ભાગ્યદાતે ।
માતે પ્રયચ્છ પ્રયચ્છ માં અંતર્મુખત્વં મહાસરસ્વતિ । તુંબરુનારદશુકશૌનકવર્ણિતેભગવતિપરાપરવિદ્યાવતિ । નવરસવતિ પ્રયચ્છ પ્રયચ્છ માં
જ્ઞાનસંપન્નતાં હે ભગવતિ ॥

## ૪૫ શારદાસ્તવમ્

હે લલિતકલા સ્વારાજ્ય પાલિનિ । સર્વશાસ્ત્રવિરાડ્રૂપિણિ ।

સમસ્ત જીવકુલભાષાંતર્યામિનિ । લેખનવાચનલોકસ્વામિનિ ।
નાદગગન વિહારિણિ । આબાલગોપ ભાવોદ્દેશ દર્શિનિ ।
સર્વવિચારભાવસ્પંદનમર્મપ્રબોધિનિ ।
સુગુણ નવરત્નસંયોજનિ । સત્યપ્રતિપાદનાતરંગિણિ ।
સપ્તસ્વરભેદગ્રહણધીશક્તિપ્રબોદિનિ ।
શ્રદ્ધાભક્તિં દેહિ મે ॥

હે કીરવાણિ । માણિક્યવીણાપાણિ । બ્રહ્મરાણિ । સચ્ચિદાનંદ પ્રોલ્લાસિનિ । દિવિજવનિતાચિંતામણિ । વેદોપનિષદ્વંદન વિહારિણિ । સારસદળનયનિ । સત્યલોકવાસિનિ । સર્વાક્ષરમાલાધારિણિ । રમ્યશ્વેતહંસવાહનિ । શ્રદ્ધાભક્તિં દેહિ મે ॥

## ૪૬ નારાયણ ધ્યાનમ્

સમદર્શિગેયમ્ । ધ્યાનયોગિ ધ્યેયં । સ્થિતપ્રજ્ઞ જ્ઞેયં । નિત્યસ્મરણીયં । પરાભક્તવર્ણનીયં । કર્મયોગિ સેવનીયં । બ્રહ્મચિંતનપ્રિયોપાસનીયં । ગૃહસ્થસંન્યાસિવેદ્યં । બ્રાહ્મીસ્થિતિપ્રિયાતિપ્રિયં । વૈરભાવયુત જયવિજય અહર્નિશિ ધ્યેયં । સર્વજીવગમ્યં । સર્વકાલ સૌમ્યં । સર્વભક્તપ્રિયં । સર્વથાસદયં । વચસા સતતં પઠનીયં શ્રીમન્નારાયણં વિજયં । અપ્રમેયં । અજેયં સંસ્મૃત્ય સંસ્મૃત્ય હૃષ્યામિ મુહુર્મુહુઃ

## ૪૭ વાસવી સ્તુતિઃ

ઓંકાર પંજરશુકામ્ । અહિંસાવ્રતનાયિકાં । શ્રીમદ્ વાસવિકન્યકાં । મૃદુલહૃત્પુંડરીકાં । કરધૃત પદ્મકુટ્મલચારુશુકાં । આશ્રિતોદ્ધારકાં । ભવાબ્ધિતારકાં । સંવિત્પ્રદાયકાં । કુસુમાંબકુસુમાખ્યવરપુત્રિકાં । વિરૂપાક્ષારાધિતવાત્સલ્યચંદ્રિકાં । અગ્નિપ્રવેશ દીક્ષાપ્રેરકાં । વહ્નિપ્રવિષ્ટદ્યુત્તરશત સબાંધવસદ્ગતિકારકાં । યોગમાયાકન્યકાં । શિરસાનમામિ પુનરપિ પુનરપિ દર્શયામિ ॥

## ૪૮ શ્રીરામ સ્તુતિઃ

દશાસ્ય મર્દનમ્ । દશાવતાર રૂપનારાયણં । જનકાત્મજારમણં । જનકવાક્યપરિપાલનં । કૌસલ્યાહર્ષવર્ધનં । દશરથભૂપાલપ્રાણસમાન નંદનં । ભાનુકુલસાગર નંદનં । અયોધ્યાસામ્રાજ્યપરિપાલનં । ધ્યાત્વા મૂકોઽસ્મિ ॥

ધર્મપરાયણમ્ । સકલસુગુણભૂષણં । એકાર્ધાંગિનીવ્રતપરિપાલનં । લક્ષ્મણશતૃઘ્નભરતપ્રેમનંદવિહરણં । ભૂતભાવનં । સાધકજન્મપાવનં । કૃપાલોચનં । ધ્યાત્વા મૂકોઽસ્મિ ॥

મંદસ્મિતવદનમ્ । પ્રસન્નમાનસભવબંધહરણં । વિજિતકરણં । અજ્ઞાનહરણં । પતિતપાવનં । સંતવરિષ્ઠાર્પિતજીવનં । હનુમત્સેવિત કંજચરણં । શ્રીરામ રઘુરામેતિ ભક્તચિત્તવિહરણં । ધ્યાત્વા ધ્યાત્વા સ્વેદાશ્રુકંપનાનુભવે મૂકોઽસ્મિ ॥

## ૪૯ શ્રીકૃષ્ણ પ્રાર્થના

વેણુવાદનચતુર । નવ વિધભક્તમંદાર । પીતાંબરધર દામોદર । યશોદાનંદકિશોર । યમુનાતટવિહાર । કૌસ્તુભમણિહારધર । નિરુપમધીર । લોકોત્તરશૂર । અસદૃશ સાહસ વીર । ધર્મ ધ્વજારોહણતત્પર । પરમોદારાસલીલામોદકર । ભવગોચર । ભવભીકર । સુંદરાકાર । રક્ષમામ્ । સર્વદાસર્વત્ર રક્ષમાં ॥

## ૫૦ ગીર્વાણિ નમનં

સપ્તસ્વરાર્ચન પ્રમુદિતે । અક્ષરમાલા વિરાજિતે । રાગતાનપલ્લવિ નીરાજન પૂજિતે ।

બ્રહ્મદેવસંયુતે । અપરાજિતે । સ્ફટિકમણિજપમાલાહસ્તે । પ્રાજ્ઞશિખામણિ સમૂહવંદિતે । આત્મજ્ઞાનમાર્ગ ગામીસમુપાસિતે ।

શુભ્રદુકૂલાન્વિતે । શ્વેતરાજીવસ્થિતે । પરમહંસયોગીશ્વરદર્શિતે । ગુરુકુલારાધ્યમાતે । સુરેશ્વરાદિ દેવગણાશ્રિતે ।

વીણાનાદલહરિક્રીડાતોષિતે । ત્વત્કૃપામાત્રેણ આનંદલીનોઽસ્મિ ॥

## ૫૧ પાર્વતી વંદનં

દશનાડિગામિનિ । આત્મતત્ત્વપ્રકાશિની । કૈલાશ◌ૃંગવિહારિણિ । સ્વયંસિદ્ધતત્વબોધિની । નંદીભૃંગીવૃંદસેવામોદિની । વિનાયકષણ્મુખ ક્રીડાહ્લાદિની । મદનાંતકાર્ધાંગિની । હિમાદ્રીશનંદિની । કેસરિવાહની । કૃપાસુધાવર્ષિણીપરાશક્તિરૂપિણી । શિવતાંડવ સહનર્તિની । લાસ્યપ્રમોદિની । સમસ્તચરાચરાકર્ષિણી । સંરક્ષિણી । સંપોષિણી । પરિપાલિની । ભુવનૈકજન ની । ઇચ્છાશક્તિજ્ઞાનશક્તિક્રિયાશક્તિપ્રદાયિની । સત્યશિવસુંદરરૂપિણી । કદંબવનસંચારિણી । શુદ્ધિં કરોતુ મમ ભાવવાહિનીમ્ । વિચારવાહિનીં ॥

## ૫૨ વાસવી સ્તુતિઃ

સર્વ જીવાનુગ્રહકારકામ્ ।

અહિંસાવ્રતસુદીપિકામ્ । શ્રીમદ્વાસવી કન્યકાં । સુકોમલ હૃદય પુંડરીકાં । મધુરમનોહર મુખાં । નયનપ્રિય ચંપકનાસિકાં । ધૃતહસ્તશુકાં । સંવિત્પ્રદાયકાં । ઘનશૈલ પુરનાયિકાં । શોકવારિધિ તારકાં । સંસ્મૃત્ય સંસ્મૃત્ય હૃષ્યામિ પ્રતિદિનં

તુષ્યામિ પ્રતિક્ષણમ્ ॥

## ૫૩ વાસવી વર્ણનમ્

સૌમનસ્ય સૌખ્યસંવર્ધિનિ । શરણાગત ચિંતામણિ । ક્ષમાશૈત્યાનુભવકારિણિ । અહિંસાભાવતરંગિણિ । સમસ્તપંડિતપામરયોગક્ષેમવાહની ।
ચરાચરજીવચૈતન્યસંચાલિનિ । કન્યકામણિ । સુધીમણિ । આજન્મ પ્રાણસંરક્ષિણિ । જીવોદ્ધારિણિ । ઉદ્વાહુવંશજન્મધારિણિ
શરણાગતચિંતામણિ ।
ગતિસ્ત્વં ગતિસ્ત્વં ત્વમેવ સર્વદા
ગતિસ્ત્વં જનનિ ત્વમેકા મોદપ્રદા ॥

## ૫૪ હે ભગવાન્

હે ભગવાન્ ત્વમદૃશ્યવાનપિ વિશ્વાકારઃ
ત્વમસ્પૃશ્યો સ્પર્શ સુખપ્રદાતઃ
ત્વમવાઙ્માનસગોચરોઽપિ શબ્દતરંગસાગરઃ માનસભાવ વિલાસકારણઃ
ત્વંનિષ્ચેષ્ટિતોઽપિ પ્રકૃતિઃ ત્વયા ક્રિયામયઃ

ત્વમતિદૂરઃ ત્વમતિસમીપઃ
નામરૂપ કર્મરહિતોઽસિ દશાવતાર મહિમાવંતઃ
જન્મસ્થાનરહિતોઽસિ સર્વદેશવાસસહિતઃ
ત્વં બંધુરહિતઃ બંધરહિતઃ સર્વાનુબંધપૂરિતઃ
ત્વમેકાકી સર્વજીવરૂપઃ સર્વદેશખ્યાતઃ
કથં તવ વૈચિત્ર્યગ્રહણં સાધ્યં?

## ૫૫ સરસ્વતી સન્નિધાનમ્

ભારતીમ્ । ધીપથગામિનીં । ભાગીરથીં । ભગવતીં ।
બ્રહ્મસતીમ્ । પ્રણમ્ય હર્ષિતોઽસ્મિ । શ્વેતદુકૂલવતીં । દિવ્યમધુમતીં । નવરસવતીં । રસવતીં । સમરસવતીં । સ્મૃત્વા પુલકિતોઽસ્મિ । શ્રદ્ધાન્વિત જ્ઞાનાર્થિ સાધનાનુકૂલવતીં । ધ્યાત્વા શાંતમાનસોઽસ્મિ । શ્રુતિસ્મૃતિસારસ્રવંતીં । પરાવિદ્યાવતીં । સદ્ધર્મવતીં । અગોચર પ્રભાવતીં જ્ઞાત્વા ધન્યોઽસ્મિ ।

## ૫૬ પાર્વતી સ્તુતિઃ

વિશ્વસુંદરિ । રત્નમંજરિ । નિત્યસત્યાનંદકરિ । વિશ્વાંબરિ । ગજાનન ષડાનન મમતાસાગરિ । વિષકંધર મનોહરિ । ત્રિશૂલધરિ । નયનમનોહરિ । મંગળકરિ । પર્વતેશકુમારિ । કોમલશરીરિ । ત્વમેવ માહેશ્વરિ । ચિત્તશોધનકરિ । જીવપાવનકરિ ત્વમેવ જગન્માતે । મમજીવત્રાતે । મમ હૃદય પુરાધીશ્વરિ જીવનદાતે ॥

## ૫૭ વિદ્યાધીશ્વરી સ્મરણમ્

વેદોપનિષદ્ગીતાસારવતીમ્ । અનુપમલાવણ્યવતીં ।
વીણાવાદનલીનકલાવતીમ્ । સદ્ધર્મવતીં । જ્ઞાનવતીં । સત્યવતીં । અવ્યક્તપ્રભાવતીં । વિદિત્વા વિદિત્વા જિતમનસ્કોસી । શાશ્વતીં । હંસગમનરતીં । મહામતીં । વિશ્વસૃષ્ટિકાર્યમગ્ન
ચતુર્મુખપ્રિયસતીમ્ । રસલોકપીયૂષ સ્રવંતીં । વિદ્યાર્જનાલોલાનુશાસનવતીં । સાત્વિક ગુણવતીં । મહાકાંતિવતીં । સ્મૃત્વા ધ્યાત્વા પાવનચિત્તોઽસ્મિ ॥

## ૫૮ લલિતા પરમેશ્વરી સ્મરણમ્

હે લલિતાપરમેશ્વરિ । કરુણાકરિ । મહોદરિ । વિશ્વંભરિ । વિશ્વાંબરિ । સમાધિઋષિગોચરિ । સમાધિગોચરિ । ભૂરિભાગ્યલહરિ । ત્રિભુવનેશ્વરિ । શ્રીમત્સિંહાસનેશ્વરિ । ત્વયા વિના કા મમ પાવનકારિણિ । સુષુમ્નાનાડિગામિનિ ।
વિવિધાભરણવસનવિરાજિનિ । સુહાસિનિ,સુકેશિનિ । દશપ્રાણગતિ નિયંત્રિણિ । કર્મપીડિતાશ્રિતાવનિ । કૃષ્ણકપર્દિનિ । ત્રૈલોક્યકુટુંબિનિ । સુવાસિનિ પૂજામોદિનિ । યોગસાગરનિર્મગ્ન
ચિંતામણિ । પતિતપાવનિ । દુરિતદૂરિણિ । ત્વયા વિના મમ કા પાવનકરી ॥

## ૫૯ દુર્ગા સ્તોત્રમ્

ત્રિદેહાંતર્ગતાત્મ સ્વરૂપિણિ । નાગવેણિ । ભક્તિનંદન વિહારિણિ । શક્તિચંદનવન સંચારિણિ । ધીબલોદ્દીપિનિ । અદ્ભુત કુંડલિનિ । વિશ્વ પ્રાણ સંજીવિનિ ॥

ચિદ્પાવક સંજાતે । આત્મજ્ઞ સંસ્પર્શિતે ।
ત્રિજગન્માતે । ત્રિગુણાતીતે । ત્રિમૂર્તિ વંદિતે । ત્રિતાપાનલ સંત્રસ્તાશ્રિત સંત્રાતે । સર્વાલંકૃતે । અરુણ દુકૂલાન્વિતે । નંદિ ભૃંગિ પરિ સેવિતે । ધર્મ સ્થાપક સંજાત શુભ દાતે । અનિમિષ વૃંદસ્તુતે દુર્ગાદેવિ પાહિમામ્ ॥

## ૬૦ શારદાદેવી નમનમ્

શ્રુતિલય ભાવસંયુક્ત નાદરંજનિ । શ્રુતિસ્મૃતિ વાણિ વીણાપાણિ । ગીર્વાણિ । “ઐં”બીજાક્ષર જપહર્ષિણિ । ચતુરાસ્ય ભાર્યામણિ । અક્ષરમાલાગ્રંથધારિણિ । સત્યલોકવાસિનિ । પરમ સત્ય પ્રતિપાદિનિ । મયૂરવાહિનિ । ગાન વિચક્ષણ કવિપુંગવધીમણિવર્ણનકલાપ્રસાદિનિ । કમલનાભ કમલાસન હરસુર ઋષિ મુનિગણનુત મહિમા પુષ્કરિણિ । મમ વરદા ભવ પરાવિદ્યા પ્રકાશિનિ ॥

## ૬૧ દુર્ગા પ્રણામમ્

ત્રિદેહ વ્યાપિનિ । ત્રિભુવન જનનિ । અનંત વિભૂતિ ધારિણિ રુંડ માલિનિ । ભયંકરાસુરવિધ્વંસિનિ । શિષ્ટજનપરિપોષિણિ । દયાર્દ્ર લોચનિ । પરતત્ત્વ સ્વરૂપિણિ । પરાશક્તિજનનિ । સચ્ચિદાનંદરૂપિણિ । વર્ણાશ્રમ વિધાયિનિ । ગુણત્રય વિલાસ વિનોદિનિ । બ્રહ્મ વિષ્ણુ મહેશ્વર સુરગણદત્ત સમસ્ત શક્તિ તેજાયુધ ધારિણિ । અષ્ટાદશ ભુજ વિરાજિનિ । વિશિષ્ટ વસના ભૂષણ શોભિનિ । સિંહવાહિનિ । દુર્ગે ત્વાં કથં દર્શયામિ જાનામિ કથં
આરાધયામિ ॥

## ૬૨ વાસવી સ્તુતિઃ

સત્યારાધકેપ્સિત પ્રપૂરિણીમ્ । આર્દ્રહૃદયોપાસ્ય વિરાડ્રૂપપ્રદર્શિનિ । ચિદેકરસરૂપિણીં । નવરસ સ્વાદુ તરંગિણીં । કુસુમાંબ સૌખ્યકારણીં । ભવતારિણીં । કૃપાવીક્ષણીં । અહિંસોદ્યમ સંચાલિનીં । વૈશ્યવંશોદ્ધારિણીં । મનુકુલપાવનીં । સર્વજીવ હિતકારિણીં । સમાધિ ઋષિવર દાયિનીં । કુસુમાખ્ય વંદ્યનંદિનીં । દિવ્યાવતારિણીં । પેનુગોંડપ્રતિષ્ઠિત દિવ્ય વનિતામણીં । વિશિષ્ટ કન્યામણીં । ગોલોક સ્વામિનીં । કન્યકાપરમેશ્વરીં
જનનીમ્ । અર્ચયિત્વા ભાવયિત્વા ધન્યોઽસ્મિ ॥

## ૬૩ પાર્વતી સ્તુતિઃ

સમસ્ત પદાર્થ પાવન કરિ । જીવ કોટિ રક્ષણ કરિ । દીન દયાકરિ । આરાધક કૃપા સાગરિ । રજત ગિરીશ્વરિ । હિમ શૈલ સુકુમારિ । ચંદ્ર મૌળેશ્વર હૃદયેશ્વરિ ।
માધુર્ય રત્નાકરિ । નેત્ર મનોહરિ । માધુરિ । શંકરિ । વિષ્ણુ સહોદરિ । વિશ્વેશ્વરિ । ધ્યાન માત્ર ગોચરિ । માતંગ વદન ષડાનન ધીશક્તિ મોદકરિ । પાર્વતિ જય કરિ । પ્રસન્ના ભવ । મમ સુપ્રસન્ના ભવ ॥

## ૬૪ હિમગિરિનંદિનિ સ્તુતિઃ

હિમગિરિ પાલ પ્રિય નંદિનિ । કૃષ્ણ કપર્દિનિ । દેવ વનિતામણિ । પતિવ્રતા ચિંતામણિ । મંજુળ ભાષિણિ નટરાજ રમણિ । કૈલાસ ગિરિવાસ હર્ષિણિ । મંદ હાસિનિ । સકલ સદ્ગ્રંથ જ્ઞાન પ્રદાયિનિ । સર્વશક્તિ સંચાલિનિ । યોગ શક્તિવિવર્ધિનિ । સર્વ વસ્તુ સ્વભાવ નિયંત્રિણિ । દૈત્ય કુલ વિનાશિનિ । વિઘ્નેશ જનનિ પાલય મામ્ ॥

## ૬૫ દુર્ગાસ્તવમ્

ચિદ્પાવક સંભવે । દિવિજ કાર્યોદ્ભવે । વિભવે । ઉદય રવિ કોટિ પ્રભે । દ્યુતિ મયિ । રયિ । પ્રાણમયિ । આનંદમયિ । પરાનંદમયિ । દુર્ગે તારય ભવશરધીમ્ ॥

નાનાયુધશસ્ત્ર ધારિણિ । નાના વિધ શાસ્ત્ર શરીરિણિ । નાના શક્તિગુણ રૂપ નામ ક્રિયાંતર્ગત પ્રકૃતિરૂપિણિ । નાના વિધ સૃજન રચન બલ પ્રસારિણિ । રાક્ષસ વંશ ધ્વંસિનિ । રાક્ષસ પત્નિ મોક્ષ દાયિનિ । દુર્ગે તારય ભવ શરધીમ્ ॥

## ૬૬ લલિતા ધ્યાનમ્

સમસ્ત જીવ પોષણકરી । સમસ્ત સસ્ય પ્રાણિ મનુજ દિવિજ સમુદાય સૃજનકરી । સમસ્ત કર્મ ક્ષેત્ર દોષ પાવન કરી । કૈલાસશિખરાધીશ્વરી । ગિરિ રાજકુમારી । કન્યાકુમારી રાજરાજેશ્વરી । સુચરિ તેશ્વરી । શ્રી લલિતા પરમેશ્વરી । તારયતુ ભવાંબુનિધીમ્ । હૃદય ગુહનિવાસિની । સ્થાવર જંગમ ચૈતન્યદાયિની ।
ઇચ્છાશક્તિ જ્ઞાનશક્તિ સંચાલિની । ત્રિગુણ લાસ્ય સાક્ષિણી । આસુરીગુણાર્ભટ વહ્નિજિહ્વા દર્શિની । દૈવ ગુણ શૈત્ય સ્પર્શ દાયિની । તારયતુ ભવાંબુનિધીમ્ ॥

## ૬૭ દુર્ગાવન્દનમ્

શ્રી લલિતામ્ । પર દેવતાં । પરશિવ વનિતાં । સુસ્મિતાં । પંડિતનુતાં । પામર શ્રિતાં । આબાલગોપનમિતામ् । હિમાદ્રિ સુતાં । તાં દુર્ગાં કથં શક્નોમિ ગાતું ॥

ચારુનવદુર્ગારૂપિણીમ્ । અસુર પરંપરા નિર્મૂલનકારણીં, અનુપમલીલાનંદિનીં । દયા નયનીં । શોક ભયગ્રસ્તભક્તાવનીં । રક્ત વિરક્તા શક્તા શક્ત સમદર્શિનીં । તાં દુર્ગાં કથં વર્ણયિતું શક્નોમિ ॥

## ૬૮ પાર્વતી સ્તવમ્

પર્વતરાજ સુપુત્રિકામ્ । કૈલાસાધિપ ભર્તૃકાં । શ્રી ચક્ર નગર નાયિકાં । ચારુચંપક સુનાસિકાં । જીવદુરિત દુઃખ શામકાં । જ્ઞાનિબુધજન મેધાવિલાસરસિકાં એકૈકાં । પ્રણવાત્મિકાં । મનન શક્તિ મથન શક્તિ સંચાલિકાં ।

પ્રાર્થય માનસ જ્ઞાન ભિક્ષાંદેહીતિ પ્રાર્થય ॥

## ૬૯ દુર્ગાદેવિ પ્રપત્તિઃ

ષટ્ચક્રમેરુસ્થિતામ્ । યોગિસંભાવિતાં । ભક્તસંસ્પર્શિતાં । જ્ઞાનિસંદર્શિતાં । આબાલ વૃદ્ધશ્રિતાં । સર્વપ્રાણિ પુનશ્ચેતન કૃતાં । ષડ્દર્શન શિખરશ્રેણિ સમારાધિતાં । દુર્ગાં માતાં પ્રાર્થય ।

બ્રહ્માંડ ભાંડોદરીમ્ । મહોદરીં । મનોચક્ષૂન્મીલનકરીમ્ । પુણ્ય ફલ ભોગપ્રદાન કરીં । સૌંદર્ય સાગરીં । મહિષમર્દિનીં । ભંડાસુર સૂદનીં । ચંડમુંડાસુર શસ્ત્ર પ્રત્યસ્ત્રવર્ષિણીં । વિદ્વદ્ગોષ્ઠિ પ્રમોદિનીં । દુર્ગાં જનનીં પ્રાર્થય ॥

## ૭૦ શ્રીમન્નારાયણ સ્મરણમ્

દેવગુરુ દેવર્ષિ મહર્ષિસમારાધિતમ્ ।
સંરક્ષિત શરણાગતમ્ । રાજર્ષિ સદ્દર્શિતં । સાધુસમુદાય પરિત્રાણ નિરતં । શ્રી મહાલક્ષ્મિ સેવાનંદિતં
સર્વજીવ ભ્રામરી ગુહાંતર્વાસિનમ્ । દુરિત વિનાશનં । ભૂદેવી ભારહરણં । દિવ્યપંકજ ચરણં । સુદર્શન ચક્રધારિણં । પાંચજન્ય શંખધારિણં । શરણાગતોદ્ધારણં । શ્રીમન્નારાયણં નિત્યોપાસયામિ ॥

દેવકી વસુદેવ નંદનમ્ । યશોદાનંદાનંદ સુખ વર્ધનં । ભાવ શુદ્ધિ પથદર્શનં । જીવ ભાવ હરણં । કમલનયનં । નરકેસરિ રૂપાવતરણં । પ્રહ્લાદ દર્શન પ્રદાનં । પરમપ્રિય સખિરાધારમણં । કૈવલ્યનિકેતનં । શ્રીમન્નારાયણં નિત્યોપાસયામિ ॥

## ૭૧ શ્રીકૃષ્ણ ધ્યાનમ્

મધુરનયન વદન વચન કર ચરણ શોભિતમ્ ।
બ્રહ્માંડ હિતમ્ । સંગરહિતં । સર્વાંગકાંતિસહિતં । ગીતાબોધામૃતદાતં । યાદવકુલેંદ્ર
પ્રિયતમ સુતમ્ । તુલસી માલાભૂષિતં । શંખચક્રગધા કમલધર ચતુર્હસ્તં પીતાંબર વિરાજિતં । ગોપિકાવૃંદવેષ્ટિતં । યોગ પ્રક્રિયા નિષ્ણાતં । અનુરાગ બંધ પુલકિતં । રોમાંચકાદ્ભુત ચરિતં । સ્વરભંગ કંપનાદિ ભાવ વિકાર મુદ પ્રદાતં । ચિત્ર વિચિત્રાસુર ધ્વંસનરતં । સ્વસ્વરૂપાનુસંધાન વિધાન બોધન નિરતં । તં પરમ પુરુષરૂપોપાસિતં સ્મરામિ । ધ્યાયામિ । શિરસા નમામિ ॥

## ૭૨ નારાયણ સ્તુતિઃ

સ્વયંભૂ શ્રીધર । સ્વપ્રકાશ શ્રીકર । સ્વયંગોચર । શુભકર । સ્વયંચાલિત પ્રાણાધાર । સ્વયં કર્મ નિરત જીવોદ્ધાર । સ્વયં કલ્પિત કોટિ કોટિ નામાકાર । ચરાચર વ્યાપ્ત નિરાકાર ।
સ્વયંરૂપિત સાત્વિક રાજસ તામસ ગુણસાર । ત્રિગુણદૂર । સ્વયં સંભવ દશાવતાર । સ્વયંબદ્ધ દેહ પંજર । નિર્વિકાર । શ્રીદેવી ચિત્તોલ્લાસકર । સહસ્ર જિહ્વતલ્પશયનકર । યોગસાધક તિમિરાપહર । પક્ષિરાજારૂઢચર । વાચાલં કરોષિ મૂકમ્ ।
મૂકં કરોષિ વાચાલમ્ ॥

## ૭૩ વાસવી દર્શનમ્

૧. યા પરદેવી ત્યાગ સંપન્ના । સુપ્રસન્ના ।
સા શ્રી વાસવી રક્ષતુ માં પરિરક્ષતુ મામ્ ॥

૨. યા પ્રકૃતિદેવી નિત્યહરિદ્વર્ણા । સા સંસ્કૃતિદેવિ રક્ષતુ માં સંરક્ષતુ મામ્ ॥

૩. યા દયામયી સમાધિહૃત્કમલ સદના
સમસ્ત જીવ રક્ષણા ।
સા તેજોમયી રક્ષતુ માં
સંરક્ષતુ મામ્ ॥

૪. યા દેવી અહિંસા નિષ્ઠા શાલિની ।
સદ્ધર્મપાલિની ।
સા આદિદેવિ રક્ષતુ માં
સંરક્ષતુ મામ્ ॥

૫. યા પરાશક્તિ તત્પદ પ્રદર્શિની
ત્વંપદ પ્રકાશિની
સા આદિશક્તિ શ્રેયોમાર્ગે ગમયતુ મામ્ ॥

## ૭૪ ભવાની સ્તોત્રં

પરાત્પરિ । તલોદરિ । મહોદરિ । વિશ્વંભરિ । વિશ્વાંબરિ । સત્યાનંદકરિ । માધુર્ય રત્નાકરિ । મૃદુલ ગુણસાગરિ । ચિત્ત પ્રસાદકરિ । મહા વિષ્ણુ સોદરિ । કૈલાસ ગિરીશ્વરિ । શ્વેત ગિરીંદ્ર કુમારિ । સ્તવ કુસુમ માલાધરિ । અર્ધનારીશ્વર મનોહરિ । પરાપરા પ્રકૃતિ રૂપધરિ । પંચભૂતાત્મક વિશ્વ ચેતનકરિ । ભક્ત કૈવલ્ય પ્રાપ્તિકરિ । મમ માતે વિશ્વમાતે અંતઃ શક્તિદાતે સાર્વકાલિક શ્રેયસ્કરિ ॥

## ૭૫ શ્રીકૃષ્ણ સ્તવમ્

ભાવયામિ વસુદેવકિશોરમ્ । કેશવં માધવં । દામોદરં । સહસ્રારાદ્રિશિખર સદ્દર્શિતં । ચિદ્ગુહવાસિતં । સહસ્રકોટિ ભાનુપ્રકાશં । સર્વગુણેશં । યાદવ કુલેશં । હૃષીકેશં । લક્ષ્મીશં । વૈકુંઠેશં । ભાવયામિ ॥

દૈવશિખામણિમ્ । પ્રાજ્ઞગુરુ ચિંતામણિં । ધર્મ કર્મ મર્મજ્ઞ સુધીમણિં । શ્યામલ શરીરં । માતુલ કંસહરં । વ્યાકુલ ચિત્તપાંડવ સંકટ હરં । વેણુગાન ચતુરં । ગીતસુધાકરં । ગીતામૃત કુંભધરં । મોહાશોકાપહરં ॥

## ૭૬ શ્રીધર સ્તુતિઃ

વંદે ક્ષીરાબ્ધિ સુકુમારિ ચિત્તાપહરમ્ ।
ક્ષીરાંભોનિધિ મથનાધારમ્ । સર્વકરણ સુંદરં । સર્વલોકાધીશ્વરં । સમસ્ત સ્થાવર જંગમાત્મક વિશ્વરૂપધરં । જીવોદ્ધારં । વેદજ્ઞાનસારં । શાંતાકારં । પ્રાણાધારં । સાકારં । નિરાકારં । શ્રીધરં । ધર્મક્ષેત્ર સંચારં । સાધક દુરિત વિદૂરં ।
મોદકરમ્ । દામોદરં । અસુરસંહારં શુભંકરં નિત્યં ભજેઽહં ॥

## ૭૭ શ્રીમન્નારાયણ ધ્યાનમ્

શ્રીમન્નારાયણમ્ । ધરહસ્ત શંખગધા સુદર્શનં । અભયપ્રદ પંકજ ચરણં । ક્ષીરાબ્ધિ કન્યકાસેવિત ચરણં । કારુણ્ય પૂર્ણ નયનં । ત્રિકાલ ભુવન પાલનં । ત્રિતાપાનલ શમનં । અણુમહદ્વ્યાપિનં । મોહનં । અદ્ભુત પીતાંબરકસ્તુઊરિ તિલક વૈજયંતિમાલાધારિણં । અનુક્ષણં હૃત્કમલે ધ્યાયામિ ॥

## ૭૮ શ્રી મહાવિષ્ણુ સ્મરણમ્

ગગનોપમમ્ । આત્મારામં । વૈકુંઠધામં । મેઘશ્યામં । દૈત્યકુલવિરામં । પરશુરામં । શ્રીરામં પુરુષોત્તમં । પતિત પાવક ચરણ પદ્મં । સંચાલિત કર્મચક્રનિયમં । વેદન વિમોચક યમં । શ્રીમહાલક્ષ્મિહૃદયધામં શ્રીમહાવિષ્ણું હૃત્કોશે ધ્યાયામિ ॥

## ૭૯ નારાયણ ભાવનં

રમા મનોહરમ્ । શ્રીધરં । શ્રીકરં । સમ્યગ્દર્શનકરં । યશઃકીર્તિકરં । ચતુર્દશભુવનાધારં । કૌસ્તુભમણિહારં । ક્ષીરસમુદ્રેશનંદિનિસેવિતસારસચરણં । સાધુરક્ષણં । દિનકરનિશાકરનયનં । બ્રહ્મવિદ્યાપ્રદાનં ।

શેષતલ્પશયનં । ગરુડગમનં । ધૂર્તશિક્ષણં । ભાવશુદ્ધિમર્મપથબોધનં વૃષ્ટિભાવહરણં । નરકેસરિ રૂપાવતરણં । પરાભક્તપ્રહ્લાદહ્લાદવર્ધનં । કમલવદનં । કૈવલ્યનિકેતનં । ભવવ્યાધિપ્રશમનં । સર્વદા સ્મરામિ ॥

## ૮૦ ત્વમેવ સર્વં હરિઃ

૧. સુવિશેષ ગુણશક્તિ વસનાભરણોઽસિ હરિ ત્વમ્ ।
નિર્વિશેષ પરબ્રહ્મ સચ્ચિદ્રૂપોઽસિ મુરારિ ત્વમ્ ॥

૨. ષોડશકલાપૂર્ણો દશાવતારરૂપોત્વમ્ । નિષ્કલો નિસ્તુલો નિષ્કળંકો ત્વં ॥

૩. સગુણસાકાર નામરૂપ સહિતો ત્વમ્ ।
અજસ્ત્વં વિરજસ્ત્વં નિર્વિકારો નિરીંદ્રિયો ત્વમ્ ।

૪. કર્મધર્મરહિતો ત્વં સંસ્કારફલરહિતો ત્વમ્ ।
સૃષ્ટિ સ્થિતિલયકારણોત્વં દેહરહિતો ત્વમ્ ॥

૫. અચ્યુતો અખંડો અમરો નિરવયવો શ્રીધરો ત્વમ્ ।
કથં ત્વં વિશ્વસ્ય પ્રેરકઃ કારકઃ ચ તારકઃ
ન જાનામિ દેવ પ્રીત્યા બોધય પરયા કૃપયા ॥

## ૮૧ નારાયણ સ્તુતિઃ

શ્રીમન્નારાયણમ્ । મુક્તિસદનં । શાપગ્રસ્ત જય વિજય મોક્ષપ્રદાનં । મોહકનીલમેઘ
શ્યામ વર્ણમ્ । નિત્યમંદહાસવદનં । શિવવિરિંચિદત્તવરકારણ દુર્મદયુક્ત દૈત્ય ભંજનં । પ્રારબ્ધપીડિત સ્થૈર્યવર્ધનં । ભક્તિ જ્ઞાનવૈરાગ્ય પ્રદાનં । મધુસૂદનં । ગંગોદિત દિવ્યકંજ ચરણં । હૃત્કોશે સ્મરામિ ॥

## ૮૨ કેશવ વંદનં

જડચેતનાત્મક લોકનિર્માપકમ્ । સકલવસ્તુસ્થિતિ પાલકં । ધર્મકર્મનિયામકં । કંદર્પજનકં । મનોબુદ્ધિપ્રાણ દેહ નિયંત્રકં । ધર્મશાસ્ત્ર પ્રવર્તકં । ધર્મસંસ્થાપકં । નતજનોદ્ધારકં । કેશવં હૃત્કોશે સ્મરામિ ॥ નિત્યાકર્ષક પ્રકૃતિ વ્યાપકં । પ્રતિજીવાનુશાસકં । દૈન્યચિંતાવારકં । પુણ્ય કર્મ પ્રેરકં । નાકસૃજનકારકં । માધવં હૃત્કોશે સ્મરામિ ॥

## ૮૩ નારાયણ સ્મરણં

નળિનાપ્ત કોટિ પ્રકાશમ્ । વૈકુંઠ પુરાધીશં । ઉડુપતિભગિનીશં । દેહકરણેશં । સદ્ભાવ સુવિચાર સંકાશં । સુદર્શનચક્ર ભૂષં । શંખનાદ તોષં । સુરેશનરેશ ઋષિગણેશં । શરણાગત હૃદય વિકાસં । કાવ્ય ગદ્ય ગાનચિત્ર તોષં । રાગ લય તાન વેણુવાદન વિશેષં । સગુણ સવિશેષં । નિર્ગુણ નિર્વિશેષં । ધર્મ પરાયણ સંતોષં । મનોહર વેષં । સચ્ચિદ્વિલાસં । પીતાંબરવાસં । મધુરભાષં । મધુરાનગરવાસં । મનોહર કેશં । સર્વદા સ્મરેત્ સર્વથા ॥

## ૮૪ લક્ષ્મી નીરાજનમ્

જ્ઞાન સલિલ ધારાવાહિનિ ।
વ્યાકુલચિત્ત પરિતાપ દૂરિણિ । સ્થિતિકર્તા ગોવિંદ મનોલ્લાસિનિ । ક્ષીરાંબુધિ રાજ નંદિનિ તવ નીરાજનમ્ । પંચશરજનનિ । દારિદ્ર્ય ધ્વંસિનિ । કીરસંભાષિણિ । ત્રિભુવનૈક મોહિનિ । કાંતિવર્ધિનિ । તવ નીરાજનં ॥ શુભાંગિ । વામાંગિ । કનકાંગિ । સરસાંગિ । કોમલાંગિ । તવ નીરાજનં ॥

## ૮૫ ષણ્મુખ સ્તુતિઃ

હે ષણ્મુખ । સુરસૈન્ય નાયક । ભવતારક । કામિતાર્થપ્રદાયક । વ્યાધિવારક । આશ્રિત પાવક । શોકમોહનિવારક । ઉમા મહેશ્વર પ્રિયનંદન । મયૂર વાહન । કારણ જન્મ ધારણ । વટુવેષ ધારણ । વલ્લીદેવસેનારમણ । તારકાસુર મર્દન । ત્રિપુંડ્ર ધારણ । શરવણ ભવેતિ ખ્યાત । અગ્નિ સંજાત । સંતાનકામીપૂજિત । ષટ્ કૃત્તિકા પાલિત ષડાનન । બાલ સુબ્રહ્મણ્યેતિ નાગરાજ રૂપારાધ્ય કુમારસ્વામી સ્થાપય જ્ઞાનદીપં મમહૃદયે ॥

## ૮૬ નારાયણ ચિન્તનમ્

યસ્મિન્ વિશ્વમિદં દૃશ્યમ્ । યેનેદં વિશ્વમદૃશ્યં
યેન ગગનં વ્યાપ્યતિ સર્વં
યેન પવનઃ શોષયતિ સર્વં
યેન પાવકઃ દહતિ સર્વં
યેન ક્લેદયતિ સર્વમાપઃ
યેન સતતં વિશ્વે ભાસયતે સર્વં
તેન શ્રીમન્નારાયણેન વિના
તવ ન જન્મ ન મૃત્યુર્નજીવનઃ
તસ્મિન્નેવ મન સ્થાપય

તસ્મિન્નેવ બુદ્ધિં નિવેશય ॥

## ૮૭ સરસ્વતી સ્તુતિઃ

યાં ચતુર્વેદાત્મિકામ્ । આહતાનાહતનાદાત્મિકાં । બ્રહ્મજ્ઞાનાત્મિકાં । પરાપરાવિદ્યા પથપ્રદર્શકાં । યાં જીવ જીવ ધીપ્રેરકાં । જ્ઞાનાર્જનોદ્દીપિકાં । શોક ભય શરધિ તારકાં । તરતમવિવેચન દાયકાં । યાં જીવ સંઘર્ષણ શામકાં । ભાવસંકર્ષણ ચંદ્રિકાં । દ્વેષવિષાપહરાં । સમતા સુધાકરાં । તાં ચતુર્મુખ બ્રહ્મ ભર્તૃકાં તત્ત્વ નિરૂપકાં
સુજ્ઞાન વિજ્ઞાન સંદીપિકાં મહાસરસ્વતીં દયાવતીં પ્રણમામ્યહમ્ ॥

## ૮૮ લક્ષ્મી સ્તુતિઃ

અરુણાંબરીમ્ । હિરણ્યવર્ણાંબરીં । અતિશયરૂપલાવણ્યરત્નાકરીં । દુગ્ધ સમુદ્રેશ કુમારીં । દુગ્ધસાગર શયન માનસ સંચારીં । સ્નિગ્ધભાવ તરંગ વિહારીં । દેવદેવેશ્વરીં । કથમારાધ્ય તૃપ્તોઽસ્મિ સમસ્ત જીવા ભયંકરીં । પાપરાશિ નિર્મૂલનકરીં । સર્વાક્ષયકારીં । ભવદુઃખદૂરીકરીં । અષ્ટદારિદ્ર્ય દુરિત શમનકરીં । અષ્ટદારિદ્ર્ય દુરિત શમનકરીં । કમલેશ્વરીં । વૈકુંઠ ધામેશ્વરીં શ્રી મહાલક્ષ્મીં કથમારાધ્ય તૃપ્તોઽસ્મિ ॥

## ૮૯ લક્ષ્મીવંદનં

નળિનદળ લોચને । નળિનાનને । નળિનાસને । નળિનચરણે । નળિનહસ્તે । નળિનહૃદયે । અરુણવસ્ત્રાન્વિતે । શ્રદ્ધાભક્તિ નિષ્ઠાપ્રદાતે । કૃપયા મામુદ્ધર । પ્રેયોપથ સંચાલિનિ । ભોગભાગ્ય સ્વરૂપ પ્રબોધિનિ । ધર્માર્થકામદાયિનિ । ચતુરાશ્રમપોષિણિ । ગોવિંદરમણિ ।
અસતો મા સદ્ગમય
તમસો મા જ્યોતિર્ગમય
કૃપયા મામુદ્ધર

## ૯૦ લક્ષ્મી માં પાલય

અપૂર્વ લાવણ્ય પૂર્ણે । કાંચનવર્ણે ।
અન્નપૂર્ણે । દયાપૂર્ણે । પરિપૂર્ણે । કેશવચરણ સેવારતિ પૂર્ણે । કૃપયા પાલય । દુગ્દાંબુધિ સમુદ્રેશકુમારિ । શ્રી મધુસૂદન હૃદયવિહારિ । ચિત્તક્ષોભાહરિ । પ્રત્યક્ષ વરાભયકરિ । સમસ્ત સંપત્પ્રદાનદુરંધરિ । વિશ્વપાલન પોષણકરિ । વૈકુંઠાધીશ્વરિ । અષ્ટૈશ્વર્યરૂપધરિ ત્વરયા મામ્ સમુદ્ધર ॥

## ૯૧ શ્રી વરલક્ષ્મી અવતુ મામ્

જનાર્દન સ્વામિ મનોરંજનિ । ઈપ્સિતપ્રપૂરિણિ ।
વિશ્વૈક સંરક્ષિણિ । ધનધાન્ય પ્રવર્ધિનિ । જીવકુલ પાવનિ । બહુવિધ નવરત્ન ભૂષિણિ । નાના વિધ સંકટ દૂરિણિ । જીવ સંસ્કારકારિણિ । શબ્દસ્પર્શરૂપરસગંધભોગપ્રસાદિનિ । પુણ્યકાર્યોલ્લાસ વર્ધિનિ । નિત્યોત્સાહધૃતિબલદાયિનિ । અવતુ મામ્ । જીવન સંભ્રમ મોદ વીક્ષણિ । વ્રતનિષ્ઠવ્યાધિહારિણિ । ગૃહસ્થાશ્રમ ધર્મ પાલન બલ સંવર્ધિનિ । મનોન્મણિ । કૈવલ્યપથગામીસંચાલિનિ । અવતુ માં ॥

## ૯૨ । શ્રીકૃષ્ણોપાસનમ્

યશોદાનંદનંદનમ્ । દેવકી તિતિક્ષા ક્ષમા વર્ધનં । મુરળીવાદન મોદપ્રદાનં । મોક્ષપ્રદાનં । પરમપ્રિયસખિ રાધારમણં । ગોપિકા વૃંદ સંકર્ષણં । કંસચાણૂર મર્દનમ્ । યાદવ વંશ પાવનમ્ । કુબ્જાંગનોદ્ધરણં । અજામિળ સ્મરણ મંત્ર તોષણં । સંમોહક વદનં । મયૂર પિંછાલંકૃત મોહનમ્ । ચારુ વસનાભરણ ધારિણમ્ । કૌંતેય પરિરક્ષણં । ધર્મરક્ષણં । સાધુ સંરક્ષણં । અસુર શિક્ષણં । જગદ્ગુરું નારાયણં નમામિ ॥

## ૯૩ લક્ષ્મી ધ્યાનં

વૈકુંઠ નિલયામ્ । દયાલયાં । સદ્ભક્તસંભાવ્યાં ।
ધનાર્થિ સંપૂજ્યામ્ । ધર્માર્થિ શુભોદયાં । દીનસુખોદયાં । મોક્ષાર્થિ સુજ્ઞેયાં । સુવિષયાર્થિ નિત્ય ધ્યેયાં । સુજ્ઞાન શીલગેયાં । શમદમસંપન્નપ્રિયાં । નય વિનય વિધેયતાદિ સુગુણાશ્રયાં । અનુભવ જ્ઞાનોદયાં । રક્ત વિરક્ત યાત્રિક ધ્યેયાં । નારાયણ હૃદય કમલાલયાં । નિત્યં આશ્રયામિ માધવ ચરણકમલ કુસુમે ॥

## ૯૪ શિવસ્તુતિઃ

સામગાનલોલમ્ । નર્તન શીલં । તપસ્વી વત્સલં । ત્રિશૂલં । આબાલ ગોપપાલં । ધ્યાત્વા ધન્યોઽસ્મિ ॥

કૈલાસાદ્રીશ્વરમ્ । હિમાદ્રિજાચિત્તહરં । ફણિહારં । નીલકંદરં । જટાજૂટધરં । નિશાકરશેખરં । ગંગાધરં । ગજચર્માંબરં । મન્મથપ્રાણહરં । મહેશ્વરં । વિશ્વલયકર્તારં । ભક્તિશક્તિદાતારં । દર્શયિત્વા ધન્યોઽસ્મિ ॥

અક્ષયમ્ । અવ્યયં । અજેયં । અમેયં । ઋષિમુનિધ્યેયં । તાંડવપ્રિયં । નિત્યાંતર્મુખત્વપ્રિયં ।
લોકેશ્વરં તપોગોચરં શંકરં નમસ્કૃત્વા ભૂયો ભૂયો ધન્યોઽસ્મિ ॥

## ૯૫ સરસ્વતી સ્તુતિઃ

શ્રી સરસ્વતીમ્ । મયૂરવાહિનીં । શ્વેતવસ્ત્રાન્વિતાં । શ્વેતપદ્માસનાં । જપમાલા પુસ્તક હસ્તાં । ગીતસુધાનુતાં । અભયાં । અક્ષયાં । અહર્નિશં ઉપાસ્મહે ।
અવ્યયાં અજેયાં અમેયાં અપ્રમેયામ્ । અગોચર
પદાર્થ નામરૂપાકાર રહસ્ય નિલયાં બ્રહ્મસ્વરૂપાનુસંધાન ધ્યેયાં ગેયાં અહર્નિશં ઉપાસ્મહે

## ૯૬ ચંદ્રશેખર નમનમ્

ચંદ્રશેખર । સમાધીશ્વર । લયયોગેશ્વર । લયકર । ગંગાધર । રજતશૈલેંદ્રજાર્ધનારીશ્વર । નાગેંદ્રહાર । વિષકંધર । ત્રિશૂલધર । પંચબાણાસુહર । પરમેશ્વર । ત્વમેવ મમ ગુરુઃ મમાંતર્ગુરુઃ । સુચિત્રાંબરાભરણયુતમ્ । પ્રમથગણવેષ્ટિતં । ઋષિમુનિતપસ્વીગણકીર્તિતં । મયૂરવાહન મૂષકવાહનધીશક્તિસંમોદિતં । રુદ્રભૂમિવાસિતં । તપોવ્રતવરદાતં । તાંડવનૃત્યનિરતં । ડમરુનિનાદરંજિતં । અપરાજિતં । ત્વમેવ
મમગુરુર્ મમાંતર્ગુરુઃ ॥

## ૯૭ ષણ્મુખભાવનમ્

હે ષણ્મુખ । સુર સૈન્ય નાયક । કામિતપ્રદાયક । ઉમાચંદ્રમૌળિપ્રિયકારક । વલ્લીદેવસેનાસુખસંવર્ધક । વ્યાધિનિવારક । તારકાસુરસંહારક ।
મમ વરદો ભવ ॥

મયૂરવાહન । કારણજન્મધારણ । વેલાયુધધારણ । કૃતવિશ્વપર્યટન । વટુવેષધારણ । ત્રિપુંડ્રભૂષણ । શરણાગતાવન । સંતાનપ્રદાન । મમવરદોભવ ॥

શરવણભવેતિ સંપૂજિત । અગ્નિસંજાત । ષટ્ કૃત્તિકાપાલિત । વિનીતચિત્તપૂજિત । બાલસુબ્રહ્મણ્ય । વિદ્વત્પૂર્ણ । તેજોપૂર્ણ આત્મજ્ઞાનપૂર્ણ મમ વરદો ભવ સન્નિહિતો ભવ ॥

## ૯૮ મહેશ્વરસ્તુતિઃ

સમસ્તભુવનસ્ય પિતરં માતરમ્ । સર્વશક્તિદાતારં । કૈલાસ શૈલવિહારં । ત્રિશૂલધરં । પાપવિદૂરં । રિપુકુલસંહારં । કર્મચક્રધરં । નંદીભૃંગી નાટ્યમોદકરં । પ્રારબ્ધકર્મશેષહરં । હરં । લયકરં । કુમારગુરુશ્રીગણનાથપિતરં । સુમશરહરં । અરિવીરભયંકરં । લિંગાકારં । નિર્વિકારં । ભક્તાશુગોચરં । ગંગાધરેશ્વરં । અદ્ભુત તાંડવ નૃત્યશેખરં । મનોબલ પ્રયચ્છેતિ પ્રાર્થયામિ ॥

## ૯૯ શ્રીલક્ષ્મી સ્તુતિઃ

નવરત્ન કિરીટ કંકણ કેયૂર ધારિણી । સપ્તવર્ણમય નવનવાભૂષણ
વિરાજિની । અરુણવસ્ત્રવિરાજિની । હરિણી । મૃગલોચની । અબ્ધિજાતભગિની ।
સર્વમનોરથદાયિનિ । પૂર્વકર્મપરિપાકજર્ઝરિત સંરક્ષિણી । ઉપાસક જન પાવની । પ્રાણસંરક્ષક
શક્તિદાયિની । આરાધક ચિંતામણી । અવતુમાં અંતસ્સુખદાયિની ॥

ક્ષીર શરધિ પ્રભુનંદિની । મનોન્મણીમ્ । ઇક્ષુચાપજનની । સુરેંદ્રાગ્નિવરુણયમાદિ દિવિજગણ સ્વામિની । શ્રીમન્નારાયણ ચરણસેવારાગિણી । શ્રીધરવક્ષ સ્થલ વાસિની । કમલ પુષ્પધારિણી । કમલ લોચની । કમલાસન જનની । શ્રી મહાલક્ષ્મી અવતુમાં અંતસ્સુખદાયિની ॥

## ૧૦૦ શ્રીગણેશોપાસનમ્

ઓંકાર નાદાનુરક્તમ્ । મહાગણ નાયકં । સર્વાભીષ્ટપ્રદાયકં । સર્વકાર્યારંભાદિવંદિતં । ઉમાશંકર સુખકારકં । ગજકર્ણકં । ગજમુખં । ગીતસુધાપ્રિયાં । ઉપાસ્મહે । સ્મરામહે । ભજામહે ॥

## ૧૦૧ શ્રી દક્ષિણામૂર્તિ સ્તોત્રં

આદિગુરુ મૂર્તિં ત્રિમૂર્તિં
ધારણ ધ્યાન સમાધિ માર્ગે સદ્ગમયેતિ પ્રાર્થયામિ ॥

ચતુર્વેદ મૂર્તિં સામગાનમૂર્તિં
ભક્તિ જ્ઞાન વૈરાગ્યભીપ્સે જ્યોતિર્ગમયેતિ આશ્રયામિ ॥

દક્ષિણામૂર્તિં વૈરાગ્યમૂર્તિં
સતતાભ્યાસરક્તચિત્તે જ્ઞેયં ગમયેતિ તપસ્યામિ ॥

તપોમૂર્તિં તાંડવમૂર્તિં સ્થાપયામિ ચિંતયામિ
અહર્નિશં ભાવયામિ આરાધયામિ ॥

તં કૃપામૂર્તિં કારુણ્યમૂર્તિં હૃદયરાજીવે ધ્યાયામિ ॥

## ૧૦૨ વાસવિદેવિ પાલય

હે વાસવિદેવી! ત્વમેવ બ્રહ્મદેવઃ
ત્વમેવ મહાદેવઃ ત્વમેવ દેવાદિદેવઃ
સંકલ્પમાત્રેણ કરોષિ સર્વમ્ । ઇચ્છામાત્રેણ યચ્છસિ સર્વમ્ ।

સ્વલ્પભક્તિ માત્રેણ પ્રસાદયસિ ચિત્તમ્ ।
સત્યાસત્યવિવેચનાર્થં
મદ્ હૃદયે જ્ઞાનસામ્રાજ્યં સ્થાપય ।
ધર્માધર્મભેદ
જ્ઞાનાર્થં
મયિ ધીદ્યુતિ સ્વારાજ્યં પાલય ।

જડચેતન વિભજનાર્થં
નિત્યાનિત્ય તારતમ્ય ગ્રહણાર્થં
મયિ ત્યાગસામ્રાજ્યં સ્થાપય હે નિરામયે
પાલય પોષય હે યશોદયે ।
કર્તૃત્વ ભોક્તૃત્વમોચનાર્થં
વિશેષ સુગુણૈશ્વર્યં દેહિ દેહિ શ્રીઘ્રમ્ દેહિ મહોદયે ॥

## ૧૦૩ ગાયત્રીધ્યાનં

બ્રહ્મ તેજો વિવર્ધિનિ । બ્રહ્માસ્ત્ર રૂપિણિ ।
બ્રહ્મલોકનિવાસિનિ । પરબ્રહ્મરૂપિણિ ।
પંચભૂતરૂપિણિ । પંચમુખિ । ત્રિલોચનિ । પંચક્લેશહારિણિ । પ્રણતાર્તિવિનાશિનિ ॥

જ્ઞાનરૂપે વેદવાણિ ભારતિ શાસ્ત્રસારમયિ
વિદ્યારૂપે પુણ્યજનનિ સરસ્વતિ નિગમાનુભવમયિ
મૂઢત્વ સુદૂરિણિ ગૂઢપથ સંચાલિની ગાઢતત્વ
સાક્ષાત્કારિણિ ધીપ્રચોદિનિ લૌકિકપ્રકાશદાયિનિ
અંતર્કાંતિ પ્રસારિણિ ગાયત્રિ સાવિત્રિ ત્વમેવ સમસ્ત વિશ્વ પ્રસવિત્રિ ॥

## ૧૦૪ સરસ્વતી સ્મરણમ્

યા દેવી શ્રીશારદા પીઠવાસિની ।
જ્ઞાન વિજ્ઞાન જનની ।
યા દેવી નિખિલ જગત્પાવની ।
અખિલ ઋષિ પુંગવ પ્રતિભોદ્દીપિની ।
યા દેવી દિવ્યાનુપમાંતશ્રી પ્રદાયિની ।
યા પરાનાદ સ્વામિની । ગીતસુધાવની ।

યા દેવી યોગશક્તિસંચાલિની । કુંડલિની । સર્વાક્ષરમાલિની । તાં નમામિ । ઐંકાર જપ પ્રસાદિનીમ્ ।
લોકજનનીમ્ । શ્રી મહાસરસ્વતીં । કાયા વાચા મનસા આશ્રયામિ
કાયા વાચા મનસા આરાધયામિ ॥

## ૧૦૫ પ્રણવધ્યાનમ્

ઓં ઓં ઓં પરબ્રહ્માત્મકમ્ । સર્વ વસ્તુ વાચકં । સર્વયોગસાધક શક્તિદાયકં । સર્વકર્મ દોષનિવારકં । અભ્યાસનૈરંતર્ય પ્રેરકં । સર્વભાષાવિજ્ઞાનરુપકં । અકાર ઉકાર મકાર માત્રાત્મકં । વિશ્વસ્પંદન કારકં । અનાહતનાદાત્મકં । પરા પશ્યંતી મધ્યમા વૈખરી નાદાત્મકં । ઓમિત્યેકાક્ષરં । શબ્દ બ્રહ્મેતિ ભક્ત્યાજપેત્ ।
ઓમિત્યેકાક્ષરં શબ્દબ્રહ્મેતિ ભૂયો ભૂયો ભક્ત્યા જપેત્ ॥

## ૧૦૬ કાશીનગરેશ્વરી અન્નપૂર્ણેશ્વરી

નિત્યાનંદકરિ પ્રાણિકોટિ જઠરાગ્નિ શમનકરિ
પ્રાણિકોટિ તેજ સ્થૈર્ય ધૈર્ય વીર્ય
સૌંદર્યકરિ ગૌરી કૌમારી આત્મબલં દેહિમે
હિમાચલવંશ યશસ્કરિ નવરત્નમય આભૂષણધરિ ષડ્રુચિ પૂર્ણાન્ન સેવન મોદકરિ
જીવસંતોષકર માતૃહૃદયધરિ
યોગોત્સાહ વર્ધિનિ રાગ પાશ વિમોચિનિ
સૂર્ય ચંદ્ર વહ્નિ સમ તેજસ્વિનિ
બલં દેહિમે
આત્મ બલં દેહિમે

## ૧૦૭ મધુસૂદન સ્તોત્રં

સ્વયં ભૂ મધુસૂદન । સ્વયંચાલિત જગત્સૃષ્ટિ કારણ । અણુમહદંતર્ચેતન । દેહવાહન પ્રાણપ્રદાન । જીવ જન્મ ,શૈશવ, કૌમાર્ય જરાકારણ,સ્મરામિ સદા ॥

આયુર્વ્યાધિ મરણ નિયામક । ધર્માધર્મ સંચય બલ પ્રદાયક । કૃતક વર્ણરૂપ ગુણકર્મવેષ નિર્ણાયક । નટન નાટક રંગાભિનય રંજક । જીવભાવ હાવ મર્મ ભેદક । ચલન વલન મુદ્રા ભંગિ વિધિવિધાન નિર્દેશક સાધકમનો નિયંત્રક સ્મરામિ સદા ॥

પરમપદસોપાનારોહિ રક્ષક । સમદર્શિ સાધુ પોષક,ત્રિકાલ જીવકારુણ્યપૂર્ણ નિયંત્રક । ક્ષણ ક્ષણ ભક્તાકર્ષક જન્મજન્મ જીવ સખ સ્મરામિ સદા ॥

## ૧૦૮ મામવતુ વીણાપાણી સર્વદા

હે ચારિત્ર્યશુદ્ધિ રક્ષિણી । ત્રિગુણ ભેદજ્ઞ યોગશક્તિદાયિની । અંતઃકરણ વૃત્તિ સાફલ્યદાયિની । બહુવિધ સંસ્કાર જાગરિણી । ભાવ પાવિત્ર્ય પાલિની । જાગ્રત્સ્વપ્નેતિ સત્યપ્રતિપાદિની । જ્ઞાનસ્વરૂપિણી । જ્ઞેયસ્વરૂપિણી મામવતુ સદા ॥

પરંધામનિવાસિની । સાધક સંજીવિની સાધક ચિંતામણી । ભક્તહૃદયાંતર્ સ્પર્શમણી ।
આત્યંતિક સુખસ્વરૂપિણી । જીવ વિમોચિની । મુક્તિ પ્રદાયિની । મામવતુ સદા ॥

દૃશ્યજગત્પાવની, સર્વપરમાણુ તરંગિણી પ્રતિસ્પંદન શોધિની । પ્રતિભાવોદ્દીપિની । પ્રતિ વિચાર પ્રકાશિનિ, અનુભવપાક સાક્ષિણી । નવનવલોક વિહારિણી નવરસાનુભવદાયિની મામવતુ સદા
હે ગીર્વાણી વીણાપાણી સત્યલોકવાસિની ચતુર્મુખબ્રહ્મ
ભામિની કાંતિવલય પ્રસારિણી નવ નવોન્મેષ શાલિની નિર્વૈરત્વમહિમાવૈભવ પ્રદર્શિની । જનની મામવતુ સર્વદા ॥

ઇતિ સર્વદેવદેવ્યષ્ટોત્તરશતનમનમુક્તાઞ્જલિઃ સમાપ્તા ।

## અનુક્રમણિકા

૧ પરમ ગુરુસ્તુતિઃ
૨ સદ્ગુરુ ધ્યાનં
૩ ગુરુસ્તવનમ્
૪ સરસ્વતી સ્તોત્રમ્
૫ શ્રી સરસ્વતી સ્તુતિઃ
૬ પ્રણવ સ્તુતિઃ
૭ આચાર્યસ્મરણં
૮ સદ્ગુરુ વંદનં
૯ વિશ્વગુરુ નમનં
૧૦ શ્રી ગુરુસ્મરણં
૧૧ ગુરુ પ્રાર્થના
૧૨ ગણેશસ્તવમ્

૧૩ ગણનાથ ધ્યાનં
૧૪ ગણપતિ વંદનં
૧૫ સરસ્વતી સ્તુતિઃ
૧૬ વ્યાસ સ્તુતિઃ
૧૭ નારાયણ સંસ્મરણમ્
૧૮ શ્રીરામ સ્તુતિઃ
૧૯ શ્રીરામ સ્તવમ્
૨૦ હનુમત્સ્તુતિઃ
૨૧ શ્રીરામનમનમ્
૨૨ દક્ષિણામૂર્તિ સ્તોત્રમ્
૨૩ ચતુર્મુખ બ્રહ્મસ્મરણમ્
૨૪ સરસ્વતી સ્તુતિઃ
૨૫ લલિતા સ્તવમ્
૨૬ ઈશ સ્તુતિઃ
૨૭ શિવમહિમાસ્તુતિઃ
૨૮ ઈશ સ્તુતિઃ
૨૯ રાજરાજેશ્વરી સ્તોત્રમ્
૩૦ નારાયણ સ્તુતિઃ
૩૧ નારાયણસ્તવઃ
૩૨ શ્રીમહાવિષ્ણુ ધ્યાનમ્
૩૩ સરસ્વતી સ્તોત્રમ્
૩૪ શારદા સ્તુતિઃ
૩૫ શ્રી શારદા સ્તોત્રમ્
૩૬ શ્રી સરસ્વતી સ્તોત્રમ્
૩૭ શારદા સ્તુતિઃ
૩૮ સરસ્વતી સ્તુતિઃ
૩૯ સરસ્વતી સ્તુતિઃ
૪૦ શારદાભિવન્દનમ્
૪૧ સરસ્વતી ભાવનં
૪૨ ગોવિંદ સ્તવમ્
૪૩ સરસ્વતી સ્તુતિઃ
૪૪ વીણાપાણિ પ્રાર્થના

૪૫ શારદાસ્તવમ્
૪૬ નારાયણ ધ્યાનમ્
૪૭ વાસવી સ્તુતિઃ
૪૮ શ્રીરામ સ્તુતિઃ
૪૯ શ્રીકૃષ્ણ પ્રાર્થના
૫૦ ગીર્વાણિ નમનં
૫૧ પાર્વતી વંદનં
૫૨ વાસવી સ્તુતિઃ
૫૩ વાસવી વર્ણનમ્
૫૪ હે ભગવાન્
૫૫ સરસ્વતી સન્નિધાનમ્
૫૬ પાર્વતી સ્તુતિઃ
૫૭ વિદ્યાધીશ્વરી સ્મરણમ્
૫૮ લલિતા પરમેશ્વરી સ્મરણમ્
૫૯ દુર્ગા સ્તોત્રમ્
૬૦ શારદાદેવી નમનમ્
૬૧ દુર્ગા પ્રણામમ્
૬૨ વાસવી સ્તુતિઃ
૬૩ પાર્વતી સ્તુતિઃ
૬૪ હિમગિરિનંદિનિ સ્તુતિઃ
૬૫ દુર્ગાસ્તવમ્
૬૬ લલિતા ધ્યાનમ્
૬૭ દુર્ગાવન્દનમ્
૬૮ પાર્વતી સ્તવમ્
૬૯ દુર્ગાદેવિ પ્રપત્તિઃ
૭૦ શ્રીમન્નારાયણ સ્મરણમ્
૭૧ શ્રીકૃષ્ણ ધ્યાનમ્
૭૨ નારાયણ સ્તુતિઃ
૭૩ વાસવી દર્શનમ્
૭૪ ભવાની સ્તોત્રં
૭૫ શ્રીકૃષ્ણ સ્તવમ્
૭૬ શ્રીધર સ્તુતિઃ

૭૭ શ્રીમન્નારાયણ ધ્યાનમ્
૭૮ શ્રી મહાવિષ્ણુ સ્મરણમ્
૭૯ નારાયણ ભાવનં
૮૦ ત્વમેવ સર્વં હરિઃ
૮૧ નારાયણ સ્તુતિઃ
૮૨ કેશવ વંદનં
૮૩ નારાયણ સ્મરણં
૮૪ લક્ષ્મી નીરાજનમ્
૮૫ ષણ્મુખ સ્તુતિઃ
૮૬ નારાયણ ચિન્તનમ્
૮૭ સરસ્વતી સ્તુતિઃ
૮૮ લક્ષ્મી સ્તુતિઃ
૮૯ લક્ષ્મીવંદનં
૯૦ લક્ષ્મી માં પાલય
૯૧ શ્રી વરલક્ષ્મી અવતુ મામ્
૯૨। શ્રીકૃષ્ણોપાસનમ્
૯૩ લક્ષ્મી ધ્યાનં
૯૪ શિવસ્તુતિઃ
૯૫ સરસ્વતી સ્તુતિઃ
૯૬ ચંદ્રશેખર નમનમ્
૯૭ ષણ્મુખભાવનમ્
૯૮ મહેશ્વરસ્તુતિઃ
૯૯ શ્રીલક્ષ્મી સ્તુતિઃ
૧૦૦ શ્રીગણેશોપાસનમ્
૧૦૧ શ્રી દક્ષિણામૂર્તિ સ્તોત્રં
૧૦૨ વાસવિદેવિ પાલય
૧૦૩ ગાયત્રીધ્યાનં
૧૦૪ સરસ્વતી સ્મરણમ્
૧૦૫ પ્રણવધ્યાનમ્
૧૦૬ કાશીનગરેશ્વરી અન્નપૂર્ણેશ્વરી
૧૦૭ મધુસૂદન સ્તોત્રં
૧૦૮ મામવતુ વીણાપાણી સર્વદા

Composed by Rajeswari Govindraj

Encoded by Lakshmi, Proofread by Lakshmi and Rajeswari Govindraj

---

*Sarva Deva Devi Ashtottarashata Naman Muktanjali*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*